It has already been made clear that the author had intended the work to be presented on the stage to the accompaniment of dance, music and action. We have it from tradition that during his life, the author himself was getting it so enacted. We also learn from reliable sources that the whole Play was being so presented to open audiences even till the early years of the present century, but it is now out of practice. Only the songs are sung and that too very widely and with great fervour. Some exponents of them sing them with the accompaniment of dance with greater prominence to Laya. The fact that it is mainly intended to be enacted is almost forgotten to such an extent that the songs in the work are popularly called 'Tarangas' forgetting that the word was used by the poet to the twelve parts into which he divided his work. We hope this publication may inspire some artists to present it completely as originally intended by the author and thus revive not only this work, but also the Dance Drama tradition. It is only when a presentation of the whole work is made on the stage with proper equipment that the glorious beauty of the work can be realised in its completeness.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

Sri M. Krishnamachrya has recorded in his 'History of Classical Sanscrit Literature' that a Bhakta named Madhavanala, in the course of successive births, was born as Jayadeva and then as Narayana Tirtha in the next and last of his births. Whatever may be the believability or otherwise of the tradition, one thing is certain, viz. that it rightly records the relative greatness of the two great Bhaktas and their two rapturous works. Jaya Deva presented Sri Krishna Bhakti as the love play of the Divine couple, Radha and Krishna in Music, Dance and narrative, in his incomparable Gita Govinda Maha Kavya. Narayana Tirtha being a Paramahamsa has taken Sri Krishna Bhakti to the level of Brahmananda, pure and simple, as propounded by our Rishis in the Upanishads and presented it as a complete Drisya Prabandha, to the accompaniment of music, dance, narrative and action.

To put it in a nut shell, the essence of Sri Krishna Lila Tarangini may be best described as Brahmananda dramatised by a Jivanmukta Saint. We invite the readers to partake of the nectar showered by the saint-poet by enjoying as much of the Ananda as they can. The poet himself invites us to do so at the end of the Play in these words :

'Srigopalaghana daparakarunapiyushadhara srita
Ya Narayanatirthabhudharaparikshipta samasta tada
Sambhu yachyutabhaktabhumishu vahan
tyanandayanti jagat
Patityam vidhunotu Krishnavilasallilatarangi nyaau.'

IX

We first tender our apologies for some misprints which crept in, in spite of the care taken by our Printers and

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

friends entrusted with the task of going through the proof. Considering the rarity of Deva Nagari Printers in these parts, we are proud to state it is better than our original expectations. We thank our Printer, Sri P. Viswanadham, Proprietor of the Pancakshari Press, Guntur for the care bestowed by him.

We heartily thank our friend and scholar, Sriman Koganti Sitaramacaryulu for going through the proofs voluntarily from love for the work.

We should primarily express our gratitude and thanks to the Andhra Pradesh Sahitya Akademi, its President Dr. B. Gopala Reddi and Secretary Sri D. Ramanujarao for readily granting financial aid to bring out this work, without which this could not have been undertaken at all.

We, then, express our respectful thanks to Sri Siva Sankara Swami for contributing the short Sanscrit Introduction in spite of his being unwell for sometime past. It is a matter for immense gratification as he happens to be a living monument of the author's greatness, being himself a scholar, poet and writer of Verse and Musical Plays in Andhra, in addition to his being one of the direct descendants of the author's own brother.

Next, we express our hearty thanks to Dr. Bhimsen 'Nirmal', M. A., Ph. D., of the Osmania University for contributing the foreword in Hindi.

We, then, bestow our blessing on Chy. Sow. N. Sarojini for having readily undertaken the preparation of the Manuscript in Deva Nagari script.

We hereby confer our hearty blessings on Kumari M. S. R. Pramila Devi 'Atreyi' B. A., Hindi Rashtra

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

Bhasha Pravina and Dip. in Music, for having prepared the Arohana and Avarohana of the Ragas used in this work as practised in the Carnatic Music and for having placed before us all the notes she made about the book for preparing her articles on this work in Telugu and Hindi.

Lastly, we express our thanks to Sri Mokkapati Narasimha Sastry and Sri P. Anjaneya Prasad, M.A., B.Ed., for having gone through these lines carefully, making valuable suggestions.

Sahiti Samiti,
REPALLE
1—1—1969

Nori Narasimha Sastry,
EDITOR

Welcome Press Private Limited, Guntur-2.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

निवेदनम्

★

विदितचरमेव सर्वेषां विदुषां सहृदयानांच येयं श्रीनारायणतीर्थयतींद्र हृदयाकाशविनिस्सृता श्रीकृष्णलीलातरंगिणीति । तेच भगवन्तो यतींद्राः षट्छास्त्रपारंगतेन वैदुष्येण,भरतनाट्यकलाधुरीणतया च बहु प्रतिभावन्त इति तत्र तत्र ग्रन्थएव दरीदृश्यते समनुभूयते च। अत-एवेयंकृतिः दक्षिणेभारतवर्षे विशेषतोह्यांध्रद्राविडविषययोः नितरां प्रसिद्धा, सर्वस्यापि वाचोविधेयता मासाद्य नानद्यते सभासु देवायत-नेषु संकीर्तनेषुच । परंतु भगवत श्श्रीकृष्णदेवस्य यद्वैभव मलौकिकं लौकिकञ्च तत्तत्सर्व मप्यनुभूयानुभूय श्रीयतींद्रपादैः सर्वभक्तानुजिघृक्षया ह्यक्षरतया निबद्धमिति स्वभावोक्तिः।

संगीतविद्भिः नाट्यकलाकोविदैः महद्भिः भक्तजनैश्च इद-मीयान्येव कीर्तनानि समधिकभक्त्या समादृत्या श्रद्धयाच गायंगायं तादात्म्य मनुभूयत इत्यनुभवसिद्धः । नकेवलं कीर्तनान्येव । गद्यानि पद्यानिच हृद्यानि बहूनि बहुधा विराजन्ते । अतः अकृतपूर्वेय मननुभूतपूर्वेय मश्रुतपूर्वेयं तरंगिणी सर्वास्वपि साहित्यप्रक्रियास्विति जोघुष्यते । साहित्यविभागे यक्षगान मिति दृश्यप्रबन्धविशेषः भरत-शास्त्रोपजीव्यः नाट्यैकप्रधानः द्राविडांध्रभाषयो रतीवैतादृशः प्रबन्ध-समूहः रंगस्थलेषु नरीनृत्यते दरीदृश्यतेच । षष्टिवर्षप्राक्पर्यंत रंग-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderabad

स्थले प्रदर्शितेयं श्रीकृष्णलीलातरंगिणी सहृदया नामोदायामासेति निर्विवाद: । इदानीम प्यनिदम्पूर्वतया समानन्दयति श्रवणमात्रेणैव। एतद्ग्रंथकर्तार श्श्रीनारायणानन्दतीर्थपादाः परमहंसपरिव्राजकाचार्य-वर्याः शिवरामानन्दतीर्थकरकमलसंजाता इत्ययमंश: एतद्ग्रन्थप्रमाणा-देव निश्चीयते। उपनिषण्मतानुसारेण श्रीकृष्णभक्तिः प्रदर्शिता आत्मनन्ददायिनी ।

परंतु एवमेव गेयनिर्माता श्रीकृष्णनायकत्वेन राधामाधव मनोज्ञश्रृंगारभक्तिबन्धुरं मधुरं कवयिता गाताच जयदेवकवि: अबोभवीत् । तदपेक्षया च स्यांतरंगिण्या मिदं वैशिष्ट्य प्रतिभाति । ग्रन्थविस्तृतौ तत्त्वतश्च । यथागीतगोविन्दे चतुर्विंशतिसंख्याकान्येव अष्टपदीनामककीर्तनानि । तरंगिण्यां बहुचरणयुतानि त्रिपंचाशदधिक शतसंख्याकानि वर्तन्ते । गीतगोविंदे शतंश्लोकानां, तरंगिण्यांतु पंचाशदधिकद्विशतमिति कथासंग्रहश्लोकसंख्यां विनववैशिष्ट्यम् । नकेवलंसंख्यामात्रेणैव गीतगोविंदात् तरंगिण्या वैशिष्ट्यमिति विषयत स्तत्त्वतश्च प्रतिभातिहृद्यै र्गद्यैः पद्यैः कीर्तनैश्च ।

अपिच गीतगोविन्दं काव्यं पाठ्यं गेयं, अभिनेयंच। इयंहि रङ्गस्थलदर्शनाय चानुकूलेति विशिष्यते । वर्णिताःखलु केवलं गीत-गोविंदकाव्ये राधामाधवयो र्दिव्यं प्रेममाधुर्यं वियोगसंयोगेच । तरं-गिण्या मेतस्यां श्रीकृष्णदिव्यलीलाः भागवत दशमस्कन्धे वर्णिताः रुक्मिणीकल्याणावधि ताएव समुचितं सरसंच भाविताः । गीतगोविंदे

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

बहुधा प्रपंचितश्शृंगारोदिव्यः । अस्यांतु तरंगिण्यां सुविस्तरं वर्णितेऽपि रासक्रीडादिके न कोऽपिकामुकव्यापार स्पर्शलेशोऽपि दृश्यते। पुनश्च गोपिका ब्रह्मानन्दरसिकाः ।

"विस्मरंत्यस्स्वकंदेह
मात्ममात्रावशेषितम्"
'आत्मन्येवसमाहिताः' 'कृतकृत्याः'

इति वैविध्येनाभिवर्णिताः

इयंहि तरंगिणी न केवलं विस्तृत्या परंतु माधुर्येण प्रौढिविशेषेण वैविध्येन सरसतया चानुपमानतां भजते । अतएव अयमेवार्थः भंग्यन्तरेण प्रस्तूयते । यथा प्रेमवर्णनात् अधिगतपुण्यविशेषबलात् जयदेवकविरेव परस्मिन् चरमे जन्मनि श्रीनारायणानन्दतीर्थरूपेणावतीर्य परमहंसपरिव्राजको भूत्वा श्रीकृष्णपरब्रह्मणि आत्मानं संयम्य मुक्तोऽभूदिति ज्ञानवृद्धैः । अन्यदेवं विविच्यते, जयदेवकविना संभावितः परमात्मा काव्यरसीकृतः । नारायणतीर्थयतिसंभावितः कोऽपिगोपबालः परब्रह्मीकृतः ।

एतद्ग्रन्थप्रणेतारः पूर्वाश्रमे गोविंदशास्त्रिनाम्ना प्रसिद्धाः । वासुदेवशास्त्रिपंडितप्रकांडानां सन्निधावधिगतसर्वशास्त्राः आंध्रदेशे गुण्टूरुमण्डल स्थित काजग्राम निवासिनः, तल्लावज्झलेत्युपनामकाः भारद्वाजगोत्रपवित्राः कृष्णयजुश्शाखाध्यायिनः, आपस्तम्बसूत्राश्च, भाट्टभाषाप्रकाशादिकबहुग्रथानां प्रणेतारश्च, इत्यांग्लोपोद्घाते विस्त-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

रेण प्रपंचित मेतेषां व गेयकारवर्याणां चरितम् । महतत्त्वंच तस्मिन्नेव बहुथोक्तं 'कविसम्राट्,' कविमर्तांड' बिरुद विभ्राजमानैः नोर्युपनामक नरसिंहशास्त्रिभिः । इति पुनरुक्तिभिया नात्र प्रस्तुतम् ।

किंबहुना, उपदिष्टो हि यो ब्रह्मानन्दः वेदांतेषु सोऽयमस्मिन् ग्रन्थे नारायणतीर्थयतींद्रैः लोकानुग्रहाय नाट्यरूपेण बहुथाप्रदर्शितः अनन्यसाधारणभंग्या इति नातिशयोक्तिः । नकेवलं दाक्षिणात्याः सर्वेऽपि भारतीयाः खण्डखण्डांतरवासिनः रसज्ञवर्याः योगिनः ज्ञानिनश्च एतद्ग्रंथप्रतिपादितं ब्रह्मानन्द मनुभविष्यंतीति प्रकटितोऽयं ग्रंथ. देवनागरलिप्याम् ।

कामदा कामिना मेषा मुमुक्षूणां च मोक्षदा ।
शृण्वतां गायतां भक्त्या कृष्णलीलातरंगिणी ॥

एवं निवेदयता
आचार्य
श्री शिवशङ्करस्वामी

साहिती समितिः
29 — 12 — 68

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

उत्तम वाग्गेयकार

'संगीत रत्नाकर' के रचयिता शार्ङ्गदेव ने वाग्गेयकार की उत्तम परिभाषा प्रस्तुत की है। उनका सिद्धांत है :-

'वाङ्मातुरुच्यते, गेयं धातुरित्यभिधीयते ।
वाचं गेयं च कुरुते यः स वाग्गेयकारकः ॥'

अर्थात् शब्द रचना तथा संगीत रचना में प्रवीण रचयिता को श्रेष्ठ वाग्गेयकार मानना चाहिए। किसी भी परिभाषा से देखें, यतिवर नारायणतीर्थ को श्रेष्ठ वाग्गेयकार और उनकी रचना 'श्रीकृष्णलीलातरंगिणी' को श्रेष्ठ गेय काव्य मानना पडेगा। उत्तर-भारत में कविवर जयदेव के गीतगोविन्द को जितनी लोकप्रियता प्राप्त है, दक्षिणभारत में गीतगोविन्द के साथ साथ 'लीलातरंगिणी' को अत्यधिक लोक प्रियता प्राप्त है। इसके कारण हैं 'तरंगिणी' में प्रयुक्त भाषा और भावाभिव्यक्ति की सरलता, भक्ति भावना की उदात्तता, संगीत का निर्मल-गंगा- प्रवाह तथा दृश्य काव्यत्व। भाव, भक्ति और संगीत की इस त्रिवेणी का प्रत्येक पद रसज्ञों का कंठहार बना हुआ है।

प्राचीन काल का कवि अपने को भगवान के हाथों का साधनमात्र तथा अपनी रचना को भगवत्प्राप्ति का साधन मात्र

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

मानना था। अतः उसने यह आवश्यक नहीं समझा कि अपने समय अथवा स्थान का उल्लेख करे। हमारे देश के सभी प्राचीन कवियों के समान ही श्रीशिवनारायणतीर्थ के समय और निवास स्थान के संबन्ध में मतभेद है। डा० यम्० कृष्णमाचार्य और डा० वी० राघवन के मतानुसार नारायणतीर्थ का जन्म सोलहवीं शती के अंतिमदशकों में और निर्वाण सत्रहवीं शती के अंतिम भाग में हुआ था। उनका जन्मस्थान गोदावरी जिले के 'कोनसीमा' प्रांत का 'कूचिमंचि' तथा ससुराल कृष्णानदी के तीरस्थ वेदाद्रि माना जाता है। उनके वंशजों और अनेक भाषाओं के उद्भट पंडित, आधुनिक तेलुगु साहित्य के मूलस्तम्भ श्री शिवशंकरस्वामी जी के मत के अनुसार नारायणतीर्थ गुंटूरु जिले के काज' ग्राम के निवासी थे। जो हो, नारायणतीर्थ वेदवेदांगों में निष्णात, संस्कृत साहित्य के प्रकांड पंडित तथा संगीत और नाट्य के आचार्य थे। युवावस्था में ही सन्यास ग्रहण कर अनेक पुण्य क्षेत्रों का संदर्शन करते हुए वे तिरुपति पहुँचे। वहाँ से तमिलनाड के 'वरहूरु' पहुँचकर, वहाँ श्री वेंकटेश्वर का मंदिर-निर्माण करवाया। वरहूरु तंजाऊर जिले में कावेरी नदी की उपनदी 'कुडुमुपत्ति' के दक्षिण तीर पर है। उसी नदी के तीरस्थ 'तिरुप्पुन्दुरुत्ति' नामक ग्राम में वे कैलास-वासी हुए। नारायणतीर्थ जी के गुरु का नाम शिवरामानन्दतीर्थ मना जाता है इसीलिए आप शिवनारायणतीर्थ कहलाते हैं।

श्री नारायणतीर्थ की कुल मिलाकर सोलह ग्रन्थ माने जाते

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

हैं। इनमें एक ग्रन्थ को छोडकर शेष सभी संस्कृत भाषा में है। तेलुगु भाषा में प्राप्त उनकी एकमात्र रचना 'पारिजातापहरण' नामक यक्षगान है। शेष ग्रन्थों के नाम इस प्रकार हैं।

१. कृष्णलीलातरंगिणी नामक यक्षगान
२. शांडिल्य भक्ति सूत्र व्याख्या
३. भक्त्यधिकरणमाला
४ सांख्य कारिका व्याख्या
५. सांख्य तत्त्वकौमुदी व्याख्या
६ न्यायकुसुमांजली टीका
७. न्यायमुक्तावली टीका
८ भाट्टभाषा प्रकाश
९. योगसूत्र व्याख्या
१०. सिद्धान्त बिन्दु लघुचन्द्रिका
१९. वेदस्तव टीका
१२. वेदान्त विभावना टीका
१३. हरिभक्ति सुधार्णव
१४. सुरेश्वराचार्यकृत पंचीकरण वार्तिक की विवरणदीपिका

इसके अंतिम दोनों पुस्तकें अनुपलब्ध हैं। शेष में से कुछ प्रकाशित है तो कुछ अप्रकाशित। कहा जाता है कि ये सभी ग्रन्थ बनारस विश्व-विद्यालय के पांडुलिपि-विभाग में हैं।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

'कृष्णलीला तरंगिणी' सरल संस्कृत भाषा में रचा गया दृश्यकाव्य है। यह आन्ध्र के देशीरूपक यक्षगान की पद्धति पर है। श्रीमद् भागवत के दशमस्कन्ध में वर्णित श्रीकृष्ण के जीवन की घटनाओं का चित्रण बारह अंकों में किया गया है। कवि ने प्रत्येक अंक को 'तरंग' माना है। ठीक है, भगवान की अनन्त लीलाएँ (भाव) तरंगों के समान ही भक्त के हृदय सागर को उद्वेलित करती रहती हैं। इस यक्षगान में वर्णित बारह तरंग निम्न प्रकार से हैं।

१. श्रीकृष्णावतार और कंस के अत्याचार

२. श्रीकृष्ण की बाल लीलाएँ यथा पूतनावध, यमलार्जुन भंजन, मृत्तिका-भक्षण और विश्वरूप

३. गोवत्स पालन, अघासुरवध, ब्रह्मा और यज्ञपत्नियों का श्रीकृष्ण का स्तवन करना,

४. कालिय मर्दन, खर और प्रलंबासुर का वध, दावाग्नि भक्षण,

५. गोपी वस्त्रापहरण, गोवर्धनोद्धार,

६. श्रीकृष्ण गोपी समागम, आध्यात्मिक तत्त्व का विवरण,

७. रासक्रीडा वर्णन, श्रीकृष्ण का अद्वैत तत्त्व का उपदेश,

८. गोपिका गीत, गोपियों का अदृश्य होनेवाले श्रीकृष्ण को खोजना,

९. अक्रूर संदेश, श्रीकृष्ण का अक्रूर को विश्वरूप दिखाना, श्रीकृष्ण और बलराम का मधुराप्रवेश,

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

१०. धोबियों से वस्त्र छीन लेना, कुब्जा को अनुगृहीत करना, चाणूर और मुष्टिक का वध, कंसवध, पितृदर्शन,

११. गोपी विरह वर्णन, उद्धव संदेश, कालयवन वध, मुचिकुन्द की स्तुति करना, द्वारका प्रवेश,

१२. रुक्मिणी विवाह तथा अष्टमहिषी विवाह ।

इन बारह तरंगों में जन्म से लेकर रुक्मिणी विवाह तक की कथा का मनोहर वर्णन किया गया है ।

प्रारंभ में मंगलाचरण, इष्टदेवता की प्रार्थना के बाद,

'वासुदेवे भगवति भक्तिप्रवणया धिया
व्यज्यते भक्ति साराढ्या कृष्णलीला तरंगिणी........

कहकर यह निर्देश किया कि भगवान वासुदेव के भक्तिप्रवण रहने वाले बुद्धिमान लोग तथा भक्तिसार संपन्न जन ही इस रचना को समझान के अधिकारी हैं । तदनन्तर चार श्लोकों में कथा का संक्षेप देकर, तीन श्लोकों में प्रथम तरंग की कथा का संक्षेप दिया गया है । उसके बाद महाराज उग्रसेन के प्रवेश गान के साथ मूल नाटक का प्रारंभ किया गया है । सारा नाटक यक्षगान की शैली में ही लिखा गया है । रुक्मिणी विवाह के बाद मंगलगीत के साथ नाटक को समाप्त किया गया है ।

'लीला तरंगिणी' में कुल मिलाकर १५६ पद हैं जिनमें से बीस-एक तो अत्यन्त लोक प्रिय और प्रचलित हैं । इन सभी

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

में भक्ति भावना ही प्रधान है। रासक्रीडा के वर्णन अवसर पर भी आध्यात्मिक तत्त्व का ही विवरण दिया गया है। यद्यपि जयदेव आदि कवियों ने गोपी और श्रीकृष्ण को आत्मा और परमात्मा का रूपक मानकर वर्णन किया है, किंतु उनमें भक्ति की अपेक्षा शृंगार की मात्रा ही अधिक परिलक्षित होती है। नारायणतीर्थ के यतीश्वर होने के कारण उनकी रचना में शृंगार की गंध-अश्लीलता की सीमा को छूनेवाला– नहीं मिलती। उनका कहना है कि गोपियाँ श्रीकृष्ण के मुख से ब्रह्म सुखसार को पान कर रही हैं। यथा :

"श्री मुररिपो वंदन पद्म मकरन्दं
ब्रह्म सुखसार वचनं बहुपिबन्तः।
गोकुल वधू मधुकरास्तु परितृप्ताः
रास भुवि मंडलकृतो बहु रमन्ते ॥आदि।"

गोपी वस्त्रापहरण के अवसर पर भी माया अथवा अहंकार रूपी वस्त्र को दूर कर गोपियों को श्रीकृष्ण अद्वैत तत्त्व का उपदेश देते हैं। इस प्रकार के अवसरों पर श्री नारायणतीर्थ ने पाठकों एवं दर्शकों को अध्यात्मरूपी अमृत धाराओं से सराबोर कर दिया है। पाठक-दर्शकों का निर्मल आनन्द में निमग्न हो जाता है। इस दृष्टि से गीतगोविंद भी अपेक्षा लीलातरंगिणी का महत्त्व अधिक है।

नारायणतीर्थ जी ने श्रीकृष्ण की बाललीलाओं का भी

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अत्यन्त मनोहर वर्णन किया है। उदाहरण के लिए एक श्लोक पर्याप्तहोगा। देखिए.

"वीथ्यां वीथ्यां व्रजभुविसुखं संचरंतं मुकुन्दम्
मध्ये मध्ये घृतदधिपयः पाययन्तं पिबन्तम्।
बुद्धौ बुद्धौ अहमहमिति स्वान्तमाभासयन्तम्
भूयो भूयः सुतमनुनयंत्याह चेदं यशोदा...."

'लीलातरंगिणी' के पद, श्लोक अथवा गद्य में कहीं भी व्यर्थ के पद नहीं है तथा भाषा अत्यन्त सरल और परिष्कृत है। अनावश्यक अलंकारों से बोझिल न होकर सरल तथा प्रवाहयुक्त शैली में रचित इस ग्रन्थ का दक्षिणभारत में समुचित समादर प्राप्त है। संस्कृत शारदा का गलहार बनी इस रचना का उत्तर भारत में यथेष्ट प्रचार नहीं है। अतः नागरी लिपी में इस रचना को पुस्तक कर, कविसम्राट श्री नोरि नरसिंहशास्त्रीजी ने सराहनीय कार्य किया है। चि०सौ० कुमारि राणी प्रमीला के द्वारा प्रस्तुत की गई संगीत-सूचनाएँ इस ग्रन्थ को महत्त्व को और भी बढ़ाती हैं। हिन्दी के समस्त पाठकों की ओर से मैं आदरणीय नरसिंहशास्त्री जी को धन्यवाद समर्पित करता हूँ।

9-12-1968
गान्धीनगर
मशीराबाद
हैदराबाद-20

— भीमसेन 'निर्मल'

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अथ कर्णाटक संगीत संप्रदाय विधानेन ग्रंथप्रयुक्त रागाणां आरोहणावरोहणानि, जनकरागसंख्यादिकंच

राग नाम	जनकराग संख्या नाम च·	आरोहणम्	अवरोहणम्
1. आनंद भैरवीराग:	20. नठ भैरवी राग:	2 2 1 2 2 . स ग रि ग म प द प नि स	. 1 स नि द प म ग रि स
2. आरभी राग:	29. धीर शंकराभरण ,,	2 1 2 . स रि म प द स	. 3 . 3 स नि द प म ग रि स
3. आहिरी ,,	8. हनुमत्तोडी ,,	1 2 1 1 2 . स रि स ग म प द नि स	. स नि द प म ग रि स
4. कल्याणी ,,	65. मेच कल्याणी ,,	2 3 2 2 3 . स रि ग म प द नि स	. स नि द प म ग रि स
5. काफी ,,	22. खरहर प्रिया ,,	2 2 1 2 2 . स रि ग म रि प म प द नि स	. स नि द प म ग रि स
6. कांभोजी ,,	28. हरिकांभोजी ,,	2 3 1 2 . स रि ग म प द स	. 2 स नि द प म ग रि स
7. कुरंजी ,,	29. धीरशंकराभरण ,,	3 2 3 1 2 स नि स रि ग म प द	द प म ग रि स नि स
8. केदार गौल ,,	28. हरिकांभोजी ,,	2 1 2 . स रि म प नि स	. 2 3 स नि द प म ग रि स

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

9. खमास ,,	28. हरिकांभोजी ,,	1 3 2 2 . स म ग म प द नि स	. 2 स नि द प म ग रि स
10. गौरी ,,	15. माया मालव गौल ,,	1 1 3 . स रि म प नि स	3 1 3 स नि द प म ग रि स
11. घंटा ,,	8. हनुमत्तोडी ,,	2 1 1 2 1 . स ग रि ग म प नि द नि स	. स नि द प म ग रि स
12. तोडी ,,	8. हनुमत्तोडी ,,	1 2 1 1 2 . स रि ग म प द नि स	. स नि द प म ग रि स
13 द्विजावंती ,,	28. हरिकांभोजी ,,	2 1 3 2 2 . स रि म ग म प द नि स	. स नि द प म ग रि ग स
14. देशाक्षी ,,	28. हरिकांभोजी ,,	2 3 2 . स रि ग प द स	. 2 1 स नि द प म ग रि स
15. धन्यासी ,,	8. हनुमत्तोडी ,,	2 1 2 . स ग म प नि स	. 1 1 स नि द प म ग रि स
16. नाद नामक्रिया ,,	15. माया मालवगौल ,,	1 3 1 1 3 स रि ग म प द नि	नि़ द प म ग रि स नि़
17. नाट ,,	36. चल नाट ,,	3 3 1 3 3 . स रि ग म प द नि स	. स नि प म रि स
18. नीलांबरी ,,	28. हरिकांभोजी ,,	2 3 1 2 2 . स रि ग म प द प नि स	. स नि प म ग रि ग स
19. पंतुवराली ,,	51. काम वर्धनी ,,	1 3 2 1 3 . स रि ग म प द नि स	. स नि द प म ग रि स

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna
0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

20. पुन्नागवराली ,,	8. हनुमत्तोडी ,,	1 2 1 1 2 स रि ग म प द नि	 नि द प म ग रि स नि़
21. पूर्वि कल्याणी ,,	53. गमन श्रम ,,	1 3 2 2 3 . स रि ग म प द नि द स	. स नि द प म ग रि स
22. बिलहरी ,,	29. धीर शंकराभरण ,,	2 3 2 . स रि ग प द स	. 3 1 स नि द प म ग रि स
23. भूपाल ,,	8. हनुमत्तोडी ,,	1 2 1 . स रि ग प द स	. स द प ग रि स
24. भैरवी ,,	20. नट भैरवी ,,	2 1 1 2 1 . स रि ग म प द नि स	. 1 स नि द प म ग रि स
25. मध्यमावती ,,	22. खरहरप्रिया ,,	2 1 2 . स रि म प नि स	. स नि प म रि स
26. मलहरी ,,	15. माया मालव गौल ,,	1 1 1 . स रि म प द स	. 3 स द प म ग रि स
27. मुखारी ,,	22. खर हर प्रिया ,,	2 1 2 2 . स रि म प द नि द स	. 2 स नि द प ग रि स
28. मोहन ,,	28. हरि कांभोजी ,,	2 3 2 . स रि ग प द स	. स द प ग रि स
29. यदुकुल कांभोजी ,,	28. हरि कांभोजी ,,	2 1 2 . स रि म प द स	. 2 3 स नि द प म ग रि स
30. रेगुप्ती ,,	15. माया मालवगौल ,,	1 3 1 . स रि ग प द स	. स द प ग रि स

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

31. वराली ,,	39. झूल वराली ,,	1 1 2 1 1 3 . स ग रि ग म . प द नि स	. स नि द प म ग रि स
32. शहना ,,	28. हरि कांभोजी ,,	2 3 1 . 2 2 . स रि ग म प म द! नि स	. स नि द प म ग म री ग रि स
33. शंकरा भरण ,,	29. धीर शंकराभरण ,,	2 3 1 2 3 . स रि ग म प द नि स	. स नि द प म ग रि स
34. श्री ,,	22. खर हर प्रिया ,,	2 1 2 . स रि म प नि स	2 2 स नि प द नि प म रि ग रि स
35. सारंग ,,	65. मेचकल्याणी ,,	2 3 2 2 3 . स रि ग म प द नि स	. 1 स नि द प म रि ग म रि स
36. सावेरी ,,	15. माया मालवगौल ,,	1 1 1 . स रि म प द स	. 3 3 स नि द प म ग रि स
37. सुरटी ,,	28. हरिकांभोजी ,,	2 1 2 . स रि म प नि स	. 2 3 स नि द प म ग प म री स
38. सौराष्ट्र ,,	17. सूर्थकांत ,,	1 3 1 2 3 . स रि ग म प द नि स	. स नि दा प म ग म री स
39. हुसेनी ,,	22 खर हर प्रिया ,,	2 2 1 2 2 . स री गा म प नि द नि स	. स नि द प मा ग रि स

राणी प्रमीला देवी, 'आत्रेयी'

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

प्रथम स्तरङ्गः

॥ मङ्गलाचरणम् ॥

हिमगिरि तनयापत्यं हेमाचल चाप समुदितं तेजः ।
कि मपि महत्तम माद्यं स्मर्तव्यं विघ्नतिमिर हरणाय ॥

गिरिराज सुतासूनुः करिराज वराननः ।
परिपंथिगणध्वंसी सुरसेव्यो विराजते ॥

≡सौराष्ट्ररागेण झटतालेन गीयते≡

जय जय स्वामिन्	जय जय ॥प॥
जय जय जितवैरि	वर्गप्रचंड
जय जय गजमुख	जय वक्रतुंड ॥अ॥
मूषकवाहन	मुनिजनवंद्य
दोषरहित	दलितासुरवृन्द
शेषभूषण	शैववारिधिचन्द्र
पोषितपरिजन	पुण्यैककन्द ॥
अद्रिसुतासुत	अनवद्यचरित
भद्रभक्तभव	भयहर मुदित
रुद्रोदितऋजु	मस्तकसहित
सद्रूपसरसिज	सुमुदितविनुत ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

लम्बोदर धीर लावण्यसार
कम्बुसुधानिधि कर्पूरगौर
साम्ब सदाशिव सत्कृतिचतुर
सामवेदगीत सकलाधार ॥

शक्रादिसुरगण सन्नुतचरण
शातकुम्भमणि दिव्याभरण
धिक्कृतघनविघ्न तिमिरावरण
धीरनारायण तीर्थ सुकरुण ॥

अमृतकलशहस्तं श्रीपते र्यानकेतुं
सुररिपुतिमिरारिं सोमसूर्यादिगीतम् ।
अमितबल मशेषप्राणिनां प्राणभूतं
निगममयशुभाङ्गं भावया म्याप्तकामम् ॥

वैनतेयं विराजन्तं विष्णुवाहन मुत्तमम् ।
वैकुण्ठाश्रय माम्नायकायं गायामि कामदम् ॥

=सुखारिरागेण झटतालेन गीयते=

श्रीनारायणवाहन श्रित मुनिजनमण्डलपावन ॥प॥

विनतावरतनय वेदाङ्गशुभकाय
विविधविश्वालय वीर मां पालय ॥अ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सकल जग त्प्राणदायक सुर सन्नुतसर्वविनायक
विकटासुर रिपुविदारक विश्व विपुलकल्याणविधायक
अकलङ्कशितिकण्ठ आश्रितवैकुण्ठ
विकचकमलतुण्ड विगतमोहकाण्ड
शकलितपाषण्ड शत्रुहरप्रचण्ड
अधिकबलोद्दण्ड अद्भुतदोर्दण्ड ॥

अशुभतिमिर चंडभास्कर साम विशदघोष पक्षभासुर
मशकीकृत सकलासुर मंजु मणिरश नाशेषशुभकर
असुरभयंकर अमृतकलशहर
कुसुमनिचयभार क्रूरभुजगहार
असदृशाचलाकार आश्रितशुभकर
लसदरुणाधर लीलामयशरीर ॥

निरवधिकामल पराक्रम नित्य निर्मल खल दुरतिविक्रम
मुररिपु चरणाब्ज संभ्रम मुनि नारायण तीर्थ मतिरम
अरविंद लोचन अघबन्धमोचन
सुररिपु शासन सोम रवि नयन
परिजनपालन पामर विदलन
गुरुकृतसेवन गोकुल भवन ॥

प्रह्लाद नारद पराशर पुंडरीक
व्यासांबरीष शुक शौनक भीष्म दाल्भ्यान् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

रुक्मांग दार्जुन वसिष्ठ विभीष णादीन्
पुण्या निमान् परमभागवतान् स्मरामि ॥

नीलाचलवरनिलयं निखिलजगन्नाथ मेक माकलये ।
नीरधिवटतरुनिकटं निजसेवकबृन्द हितविधातारम् ॥

=सौराष्ट्ररागेण त्रिपुट तालेन गीयते=

सुभद्राबलभद्र सुदर्शनसहित ॥प॥
इभराज तारक ईश मा मव देव ॥अ॥
लवणजलधितीर ललितनीलाचल
नवमणिपरिशोभि नव्यदिव्यभवन ॥
वटविटपि निकट वरसिंहासन
निटलाक्ष विधिकृत नित्यमङ्गलाचरण ॥
मार्कंडेय जलधि मध्यगणेशहित
दुर्गतिहर अष्ट दुर्गापरिवेष्टित ॥
पतितजन पावन परमदिव्यमंगल
अतिकरुणाकर अद्भुत महाप्रसाद ॥
जगन्मोहन मंटप जयशब्दबहुल
जगदेकनायक जितसुरारिमंडल ॥
विनतातनय सेव्य विनतमंगलकर
विदलित भवबन्ध वेदवनसंचार ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

नारदादिमुनिगेय नामधेय सुखद
नारायणानन्द तीर्थभावितानन्द ॥

———

सर्वज्ञानक्रियाशक्तिं सर्वयोगीश्वरप्रभुम् ।
सर्ववेदमयं विष्णुं प्रभुविष्णु मुपास्महे ॥

≡ नाटरागेण जम्पे तालेन गीयते ≡

जय जय रमानाथ जय जय धरानाथ ॥प॥
जय जय वराहपुरि श्रीवेङ्कटेश जय जय ॥अ॥
निगमगोचर नित्य निर्मलानन्दघन
विगलित महामोह विमलविज्ञान
खगयानसंचार खंडितासुरनिकर
सकलगुण संपन्न सत्यपरिपूर्ण ॥
मधुसूदनानन्त मायया कृतभुवन
विधु दिवाकर नयन वेदांतभवन
विधि मुख सुरेंद्रनुत विपुल कल्याणयुत
विमल योगिध्येय विविधमुनि गेय ॥
मुर नरक संहार मूढमतिजन दूर
परिजन शिवङ्कर परावरशरीर
निरवधिक कारुण्य निखिललोक शरण्य
सरसनारायण तीर्थ सद्गुरुवरेण्य ॥

———

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

रुक्मांग दार्जुन वसिष्ठ विभीष णादीन्
पुण्या निमान् परमभागवतान् स्मरामि ॥

नीलाचलवरनिलयं निखिलजगन्नाथ मेक माकलये ।
नीरधिवटतरुनिकटं निजसेवकबृन्द हितविधातारम् ॥

≡सौराष्ट्ररागेण त्रिपुट तालेन गीयते≡

सुभद्राबलभद्र	सुदर्शनसहित ॥प॥
इभराज तारक	ईश मा मव देव ॥अ॥
लवणजलधितीर	ललितनीलाचल
नवमणिपरिशोभि	नव्यदिव्यभवन ॥
वटविटपि निकट	वरसिंहासन
निटलाक्ष विधिकृत	नित्यमङ्गलाचरण ॥
मार्कंडेय जलधि	मध्यगणेशहित
दुर्गतिहर अष्ट	दुर्गापरिवेष्टित ॥
पतितजन पावन	परमदिव्यमंगल
अतिकरुणाकर	अद्भुत महाप्रसाद ॥
जगन्मोहन मंटप	जयशब्दवहुल
जगदेकनायक	जितसुरारिमंडल ॥
विनतातनय सेव्य	विनतमंगलकर
विदलित भवबन्ध	वेदवनसंचार ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

नारदादिमुनिगेय नामधेय सुखद
नारायणानन्द तीर्थभावितानन्द ॥

सर्वज्ञानक्रियाशक्ति सर्वयोगीश्वरप्रभुम् ।
सर्ववेदमयं विष्णुं प्रभुविष्णु मुपास्महे ॥

= नाटरागेण जम्पे तालेन गीयते =

जय जय रमानाथ जय जय धरानाथ ॥प॥
जय जय वराहपुरि श्रीवेङ्कटेश जय जय ॥अ॥
निगमगोचर नित्य निर्मलानन्दघन
विगलित महामोह विमलविज्ञान
खगयानसंचार खंडितासुरनिकर
सकलगुण संपन्न सत्यपरिपूर्ण ॥
मधुसूदनानन्त मायया कृतभुवन
विधु दिवाकर नयन वेदांतभवन
विधि मुख सुरेंद्रनुत विपुल कल्याणयुत
विमल योगिध्येय विविधमुनि गेय ॥
मुर नरक संहार मूढमतिजन दूर
परिजन शिवङ्कर परावरशरीर
निरवधिक कारुण्य निखिललोक शरण्य
सरसनारायण तीर्थ सद्गुरुवरेण्य ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

कृष्ण कृष्ण कृपासिंधो भक्तसिंधुसुधाकर ।
मा मुद्धर जगन्नाथ मायामोह महार्णवात् ॥

≡सौराष्ट्र गेण त्रिपुट तालेन गीयते≡

मत्स्य कूर्म वराह नरमृग वाम नामर भार्गव ।
कुत्सितारि विराम दशरथ राम वलरा माभव कृष्ण कृष्ण ॥
कृष्ण कृष्ण कृपासमुद्र वितृष्ण बुद्ध गुणाकर ।
कृष्ण कल्किशरीर खलजनकृन्तनामर सुखकर कृष्ण कृष्ण ॥
नित्यशुद्ध सुखानुभूति निरंज नाखिलरंजन ।
प्रत्यगेक रसैकविग्रह परमपावन पावन कृष्ण कृष्ण ॥
गोपगोपी गोधनावन गूढपरत त्वाच्युत ।
तापहर नारायणतीर्थ संतारक विजयगोपालक कृष्ण ॥

अधिकारि निरूपणम्

वासुदेवे भगवति भक्तिप्रवणया धिया ।
व्यज्यते भक्तिसाराब्धा कृष्णलीला तरंगिणी ।

प्रवन्ध प्रतिपाद्य कथासंग्रहः

आदौ कृष्णावतार स्तदनु नरहरे बाललीलाविलासो
वत्सानां पालनं तच्चरित मथ गवां पालनं प्रौढभावः ।
गोपीवस्त्रापहार स्तदनु गिरिवरोद्धारणं रासलीला
कंसादीनां निरास स्तदनु जलनिधौ द्वारकायां प्रवेशः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

रौहिणेयस्य कृष्णस्य विवाह स्तदनन्तरम् ।
रुक्मिण्या द्यष्टमहीषी सहितो गीयते ऽमरैः ॥

इ त्येवं संग्रहे णोक्ता कृष्णलीलातरंगिणी ।
आद्यः कृष्णावतारो ऽयं संग्रहे णाभिनीयते ॥

उग्रसेन स्ततः कंसो देवकीवसुदेवयोः ।
तयोः कारागृहे वासः कंसेन विहितः किल ॥

ब्रह्मा सुरेंद्रो धरणी सनकाद्या स्ततो हरिः ।
भगवत्प्रार्थना तेषां तत्तत् स्थाननिवेशनम् ॥

नारद स्योपदेशेन षट्सुतानां विदारणम् ।
देवक्या स्सप्तमो गर्भः संकर्षण इ तीरितः ॥

गोकुले कृष्णगमनं दुर्गाया मधुरागमः ।
कथाया स्संग्रह स्त्वेवं चरित्रेऽस्मि न्निगद्यते ॥

—— ——

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

कथा प्रारम्भः

अथ त त्रादा वुग्रसे नागमनम्

≡[दरुवु] सौराष्ट्ररागेण आदितालेन गीयते ≡

अग्रेसरो महात्मनां अग्रगण्यो ऽपि धीमताम्
उग्रशासनकाग्रणी रुग्रसेनो विराजते ॥

अथ कंसागमनम्

≡[दरुवु] सौराष्ट्ररागेण आदि तालेन गीयते ≡

शठो हठादधर्मकृन् महामूढो महाबली
कठोरहृदयो नित्यं कंसासुर स्समायाति ॥

अथ देवक्यागमनम्

≡[दरुवु] नादनामक्रियारागेण आदितालेन गीयते ≡

आयाति देवकी दिव्यसुन्दरी विष्णु-
मायेव साक्षा दिय ममरनारी
नराधिप वरगेहिनी श्री-
नारायणीय दिव्यमूर्ति जननी
इन्दुवद नारविंदलोचना शुभ
कुन्दरदना कुटिलकुन्तलघना ।

अथ उग्रसेनानुज्ञया वसुदेवागमनम्

≡[दरुवु] श्रीरागेण आदितालेन गीयते ≡

असुरारण्य कुठारो वसुमत्यां महा नसौ
वसुधाधिप तिलको वसुदेवो विराजते ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अशरीरवाणी श्रवणम्

अथ देवकीवसुदेवयोः विवाहोत्सवानन्तरं वसुदेव गृहप्रवेशसमये तयो स्सारथ्यं कुर्वति कंसे देवक्या स्त्वष्टमो गर्भः कंसमृत्यु रित्यशरीरवाक्यं श्रुत्वा कंसो वसुदेवं प्र त्याह ॥

कंसप्रतिज्ञा

वसुदेव हनिष्यामि करिष्या म्यात्मना हितम् ।
देवकीं भगिनी मेनां मृत्युबीजं ममा प्यहम् ॥

अथ वसुदेवः कंसं प्र त्याह

≡[मंजरी] कांभोजिरागेण जंपे तालेन गीयते≡

हे कंस राजसुत हे नरश्रेष्ठ
हे सत्यसंधकुल जलधिभवरत्न
हे सौम्यगुणयुक्त हितजनासक्त
कल्याणवेद्यां च कलितबहुभद्राम्
मुंच भगिनी मद्य मुहु रधिक हृद्याम्
सत्यं वदामि तव सत्यसंधो ऽस्मि
दास्यामि तज्जात वत्सा ननिंद्य
मा साहसं कर्तु मर्हसि सदैव
तव भगिन्यैव सह सुख मधिवसामि
भवने तवैव वर मस्तु शुभ मद्य ॥

———

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

देवकी वसुदेवयोः कारागृह प्रवेशः

अथ वसुदेववाक्यं श्रुत्वा कंस स्तौ कारागृहं प्रावेशयत् ।

अथ ब्रह्मागमनम्

≡[दरुवु] नादनामक्रियारागेण आदितालेन गीयते ≡

आयाति चतुरास्यो ब्रह्मा सदसि
गायं गायं ध्यायं ध्यायं विष्णुं चेतसि
दंड कमंडलु धारी दानववैरी
अंड ब्रह्मांड विधाता अखिलजनयिता

——

अथ देवेन्द्रागमनम्

≡[दरुवु] श्रीरागेण आदितालेन गीयते ≡

वृंदारकादिविनुतो मन्दं मन्दं महासुखम्
अंतरंगे विचिंतयन् इन्द्रो महान् विराजते ॥

——

धरण्याः भगवन्तंप्रति शरणागतिः

अथ धरण्यागमनम्

≡[दरुवु] मध्यमावतिरागेण आदितालेन गीयते ≡

लावण्यमूर्ति र्धरणी समायाति ललितभासुरधारिणी
सर्वलोकहितकारिणी सदा देवी सत्यलोकसंचारिणी ॥

——

दृष्ट्वा सुरेंद्र ब्रह्माणं ब्रह्मणो ऽनुज्ञया सह ।
ब्रह्मणा च सुरेंद्रेण विष्णुं सा शरणं गता ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अथ भगवान् अपरिमितचिदानन्दसत्यपरिपूर्णः परमात्मा अनाद्य-निर्वचनीयाचिंत्यशक्तिः मायाविलसितलोकानुजिघृक्षया परिगृहीत दिव्यमंगलविग्रहमूर्तिः श्रीमन्नारायणः क्षीराब्धौ शेषपर्यंकशयनो महानन्दो सदा ऽऽस्ते । त मेव मसुरभारभाराक्रांता गोरूपधारिणी धरणी सुरपतिमुखसुरपरिवेष्टिता सती अनन्यशरणा शरण माजगाम ॥

अथ सनकादीनां ऋषीणां भगवन्नाममाहात्म्यं ख्यापयता मागमनं गीयते

श्रीमन्नारायणदर्शनार्थं सनकादीना मागमनम्

≡भैरविरागेण आदितालेन गीयते≡

राम कृष्ण गोविं देति नामसंप्रयोगे ॥प॥
काम मिह स्नातव्यं सर्वोत्तमप्रयोगे ॥अ॥
दिग्देशकाला नपेक्ष सिद्धसर्वसुलभे
सद्गुरु कृपासमुद्र संगहेतुलाभे ॥
रामनाम गंगा सं मिलित कृष्णकृष्णनाम
यामुने गोविंद नाम सरस्वती प्रथिते ॥
योगिमानस परम हंसकुलकलिते
वागीश विष्णु रुद्रादि वाग्लहरी ललिते ॥
सर्वलोकालोककाम सांगफलदाने
निर्विशेष नित्यानन्द लाभसुनिदाने ॥
ऋग्यजुस्सामादि वेद शाखिमूलविलसिते
रागलोभादिसंताप शांतिकरचरिते ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

स्नानसंध्याजपहोम तर्पणानपेक्षिते
हानिवृद्ध्यादि रहि ताखंड़सुखफलदे ॥
स्नानं मानसिंक तस्य स्मरणं वाचनिक्रम्
कीर्तंन कायिंक तस्य कीर्तने सुनर्तनम् ॥
यागयोग रागभोग त्यागसंबन्धं विना
भक्तिविरक्तिविज्ञानद्वारा मुक्तिफलदे ॥
ब्रह्मविद्यालक्षण निरीक्षणविचणणे
वाधित घोरसंसार वारण तत्कारणे ॥
सर्वपापौघ तिमिर चंडसूर्यमंडले
साधु नारायणतीर्थ तीर्थराजविमले ॥

एवं सनकादिभिः प्रशंम्यमानदिव्यनामामधेयो ।
भगवान् शेषशायी आविरासीत् तदेत दभिनीयते ॥

≡[दरुवु] शंकराभरणरागेण चापुतालेन गीयते≡

अशेषलोककारणं अनादिमध्यमव्ययम्
सशेषशयनो विभु विंशेषतो विराजते
महाफणींद्रशयनो महामुनींद्रसेवितो
महालक्ष्मीमहीयुतो महाविष्णु विंराजते ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

एवं भगवति प्रसन्ने प्रणिपातपूर्वकं महाविष्णुं प्रति धर ण्युवाच ॥

शरण मुपगता ऽहं त्वां शरण्यं जनानां
निखिलभयवियोगं योगिचिंत्यं महांतम् ।
सुररिपुगणभारं दुस्सहं दुर्भरं मे
परिहर परमात्मन् भक्तिसिद्धैकमूर्ते ॥

=सौराष्टरागेण आदितालेन गीयते=

शरणं भव करुणां मयि	कुरु दीनदयालो
करुणारस वरुणालय	करिराज कृपालो ॥
अधुना खलु विधिना मयि	सुधिया सुरभरितम्
मधुसूदन मधुसूदन	हर मामकदुरितम् ॥
वरनूपुरधर सुन्दर	करशोभितवलय
सुरभूसुर भयवारक	धरणीधर कृपया
त्वरया हर भर मीश्वर	सुरवर्य मदीयं
मधुसूदन मधुसूदन	हर मामक दुरितम् ॥
घृणिमंडल मणिकुंडल	फणिकुंडलशयन
अणिमादिसुगुणभूषण	मणिमंटपसदन
विनतासुतघनवाहन	मुनिमानसभवन
मधुसूदन मधुसूदन	हर मामक दुरितम् ॥
अरिभीकर हलिसोदर	परिपूर्णसुखाब्धे
नरकांतक नरपालक	परिपालितजलधे

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

हरिसेवक शिवनारा यणतीर्थ परात्मन्
मधुसूदन मधुसूदन हर मामक दुरितम् ॥

इति विविधवचोभिः प्रार्थयंत्यां धरण्या
मखिलभुवनमित्र शत्रुहन्तार मीशम् ।
विधिमुखसुरवर्या स्तुष्टुवु र्विष्णु माद्यं
निखिलनिगमवेद्यं स्वार्थसंसिद्धिहेतुम् ॥
क्षीराब्धिमध्य भुजगेन्द्र महासनाय
देवाय नाभिकमलोदितपद्मजाय ।
योगींद्रभाव्य गगनामलनित्यबोध
भूमाभिधाय पुरुषाय नमः परस्मै ॥

=शंकराभरण (आनन्दभैरवी) रागेण त्रिपुटतालेन गीयते=

नारायणाय नमो माधवाय ॥प॥
नागेन्द्रशयनाय नंदिताखिललोकाय ॥अ॥
नाभिकमलजनित विधिमुखाय नूतनजलधराभाय
नानाचराचर नारीनर रूपाय
नारदादि मुनिवर्यवंदित घनमायाय ॥
अगणितगुणगणाय आगमगेयाय
विगलितभयशोकाय
गगननिर्मलबोध गंभीरभावाय
भगवद्भक्त हृदयपद्मभानुरूपाय

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

करधृत रथचरणकंबुपंकज कौमोदकीशार्ङ्गाय
निरवद्यगलशोभि निजकौस्तुभभूषाय
परिहृतपरपक्ष पक्षिराजवाहाय
जगदेकनाथाय जातमदनाय जितवैरिमंडलाय
निगमनिश्वासाय नित्यानन्दरूपाय
निरुपमगोकुल नीतनवनीताय ॥
आमयादिविरहिता याखिलमायाय
कामकोटिसुन्दराय
नामरूपरहिताय भूमस्वरूपाय
सोमसूर्यनयनाय सामगानगेयाय ॥
वारिजलोचनाय वासुदेवाय वरमुनिपारिजाताय
करुणाकर भक्तकारुण्यसाराय
नारायणतीर्थ नतचरणाब्जाय ॥
इति स्तुत्वा जगन्नाथं कृतांजलिपुटटा स्सुराः ।
मुहु र्मुहु र्नमन्त स्त मूचु श्चात्महितं वचः ॥
भगवा नपि ता नाह भक्तिनम्रा नसौ सुरान् ।
अवतीर्य यदो र्वंशे करिष्यामि हितं तु वः ॥

इत्येवं भगवतो वासुदेवस्य वदनसुधानिधिगलितां स्फुटतरपदरस-मनोहरां वचनसुधाधारां सुरभूसुरवलाधारां श्रवणांजलिपुटैः पायं पायं शनैः शनैः स्वस्वभवनाभिमुखाः तच्चरणस्मरणचंद्रिकापनोदित शोक-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

मोहानलांधकाराः चतुराननादय स्सर्वे गीर्वाणाः करतलकलितकपित्थोपमं स्वकार्यं मन्वाना स्संपूर्णमनोरथाः स्वस्वभवन माविविशुः ॥

ददौ कंसाय देवक्या शिशुं प्रथमजं नृपः ।
अष्टमं सा रिपुं मत्वा ददौ कंसः पुन श्शिशुम् ॥
तद्भूतं नारदो ज्ञात्वा त्वरया कंसमंदिरम् ।
समागतो निमित्तज्ञ श्शिशूनां निधनं प्रति ॥

अथ नारदागमनम्

==[दरुवु] पंतुवरालिरागेण रूपकतालेन गीयते==

नारायण नारायण नाराय णेति सततम्
वारं वारं गायन् भक्त्या नारदो ऽयं विराजते ॥

——

अथ कंसंप्रति नारदवचनम्

अष्टाना मष्टमत्वे तु न विशेषोऽस्ति कश्चन ।
उपेक्षसे कथं मूढ यत्कर्तव्यं कुरुष्व तत् ॥
एव मुक्तो नारदेन षट्सुता नवधी त्खलः ।
संकर्षण स्तु रोहिण्या मानीतो योगमायया ॥

श्री कृष्णावतार घट्टः

अथ भगवदाविर्भावः

==[दरुवु] मध्यमावतीरागेण आदितालेन गीयते==

शंखी चक्री गदी पद्मी शार्ङ्गी किरीटकुंडली
श्रीवत्स कौस्तुभी दिव्य पीतांबरो विराजते ॥

——

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

हरि रथ निजशक्त्या मूर्ति मास्थाय देवः
प्रकटितनिजरूपः प्रादुरासी न्मुकुन्दः ।
यदुकुलवरगेहे देवकीगर्भवासा
दुदितममरबृन्दं देव मस्तौ दनन्तम् ॥

कल्याणं विननोतु कौस्तुभमणिं कंठे दधान श्शिशुः
कयल्याणी मपि मे करोतु शुभदां वाणीं प्रवीणां धियम् ।
देवक्या वसुदेवयादवपते श्शंखी रथांगी गदी
पद्मी नन्दक शार्ङ्गचापमकुटी पीतांबरः कुंडली ॥

= कल्याणिरागेण आदितालेन गीयते =

जय जय श्रीनिवास　　जय जीमूताभ जय जय ॥प॥
भयकारणाविनाश　　भक्तमानसनिवास ॥अ॥
कमलदल नयन　　कनकमय वसन
रमणीय चन्द्रानन　　रंजित भुवन
कमलावल्लभ दीन　　कामितफलनिदान
कामकोटिसम　　मोहन
मंजुलकंजवदन　　महामोहमथन
मंगलफलदान　　मौनींद्रबृन्दाधीन ॥
सुन्दरचरणार　　विंद मणिनूपुर
मंजुलमुक्ताहार　　मन्दरधर
कुन्दरदन सुर　　वंदित मनोहर
चंद्रिकासमस्मेर　　बाल

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

नीरदघननील पारा वारविहार परि
पालित भू रादि लोकनिकर ॥
विपुलपुण्डरीकाक्ष विश्वसंत्राणदक्ष
अपहृतासुरपक्ष आर्तसंरक्ष
तापसजनरक्ष तारणाध्वरदीक्ष
आपदुद्धार कटाक्ष
अशेषदुष्टशिक्ष नानानिगमलक्ष
नारायणतीर्थपक्ष श्रीगोकुलसंरक्ष ॥

देवक्या श्शिशुभाव मेत्य भगवान् नारायणः श्रीपतिः
सर्वज्ञानमहाविभूतिसहित स्सत्प्रार्थनैः कर्मभिः ।
आदित्येन्दुसहस्रकोटिसदृशा भासा गृहं भासयन्
पित्रो स्स्नेहसुधामहोदधिशशांकोऽयं हरि र्गीयते ॥

कृष्णंप्रति देवकीवसुदेवयोः स्तोत्रं

= केदारगौलरागेण आदितालेन गीयते =

मंगलालय मा मव देव पंकजासनभावितभाव ॥प॥
देवकीवसुदेवतनूज दिव्यकिरीट दलितभवबीज
सर्वयोगिविचिंत्यपदाब्ज संगताखिलसाधुसमाज ॥
अपरिमितानन्दबोधस्वरूप अतिकरुणाकरधृतचाप
कपटदैत्यहर खंडितपाप कनकांबरधर कलितकलाप ॥
मकरकुंडलकेयूरविभूषण मनसिजशतकोटिमंजुलवेष

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

विकचकमलसन्निभविपुलाक्ष विमलहृदयगोपालकरक्ष ॥
कलितश्रीकौस्तुभकमनीयकंठ करुणारसभरमिलितवैकुंठ
परिपालय भुवि भाग्यवितरण गुरुभक्तनारायणतीर्थशरण ॥

अलौकिक मिंद रूप मालो क्यानकदुन्दुभिः ।
हरेस्सभार्यः प्रोवाच कंसाद्भीत स्त्वधीरधीः ॥
सर्वाधार रमापतेऽथ भवता तच्चिंतनीयं विभो
यत्कर्तव्य मशेषदोषविभुना ब्रह्मण्यरक्षाविधौ ।
एवं रूप ममानुषं मुनिवरध्येयं समाच्छादय
स्वामिन् मानुषबालभाव मधुना संदर्श यास्मान् प्रति ॥

=मुखारिरागेण अटतालेन गीयते=

रक्ष रक्षासुरशिक्ष राजीवदलायताक्ष ॥प॥
अक्षीणकृपाकटाक्ष आश्रितपक्षसंरक्ष ॥अ॥
सर्वमनोरथाध्यक्ष सर्वलोकावनदक्ष
सर्ववेदांतैकलक्ष सर्वयोगींद्रसंरक्ष ॥
अप्रमेयबलवीर्य अनुपममहौदार्य
अपरिमितगांभीर्य अव्ययाखंडितैश्वर्य ॥
अच्यु तानन्त गोविंद अत्यन्तनिर्मलानन्द
विच्युतसंसारकन्द विश्वमङ्गल मुकुन्द ॥
पतितजनपावन पङ्कजसुन्दराानन
पतगपतिवाहन पंडितजनपालन ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

तावक रूपमुदारं धारय शांतसंसारम्
दर्शय मानुषाकारं देव बालकशरीरम् ॥
चिंतया थ यद्विधेयं चेतसा चिर मनुभाव्य
अंतरायो माभू दद्य आगमबृन्दसंवेद्य ॥
अद्य मे जन्मसाफल्यं अद्य मे वंशनैर्मल्यम्
सद्य एव समजनि संभूते त्वयि भूमनि ॥
कलिकल्मषनाशनं कामितफलनिदानम्
नारायणीय चरितं नारायणतीर्थगीतम् ॥

वसुदेव भगवत्प्रेरणया कृष्णं गोकुलं प्रति नयनम्

इति निगदति तस्मिन् यादवेन्द्रे सभार्ये
भवभयतिमिरारि र्देवकीभागधेयम् ।
सकलनिगमगुह्यं दर्शयन् स्वीयभावं
परमकरुणया तौ सांत्वय न्नेत दाह ॥

≡पूरिकल्याणिरागेण [सावेरि] आदितालेन गीयते≡

अवधारय मा मीश्वरं देवादिदेवं अवधा ॥प॥
तव तान तपसा संतोषितोऽहम्
तावक तनयात्मनावनौ समवतीर्णाखिलसारम् ॥अ॥
आगमांतैकमानक मनन्यभावं
अगणित लोकनायकम्
विगलितमोह मेकं विमलयोगितारकं
गगनाकारक मेकं गतागतनिवारकम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

मधुरापुरं समानय मामकयोग
माया मिह निधापय
अथ गोकुले नय मा ऽनवद्यनन्दालयं
विधिना कृतनिलयं विविधयोगिसुगेयम् ॥
संकर्षणाख्य मव्ययं साधुविधेयं
संभूत माश्रिताभयम्
शृंगारादि निलयं श्रीरामनामधेयं
संगतं मत्सहायं सर्वलोकाभ्युदयम् ॥
सुरवैरिभूरिसंकुलं धरणीतल मिद
सुरहरणोद्यमम्
परिभावय मा मिति परमात्मगीत मिह
वरनारायणतीर्थ विरचित मेत दिति ॥
सुप्तेषु कंसदूतेषु द्वारे षूद्घाटितेषु च
मदाज्ञया यमुनया दत्तमार्गेण मां नय ॥
इति कथितव तीश्वरे त थैव
प्रणयवशा दकरो द्यदुप्रवीरः ।
सुख मधिवसति स्म गोकुलाख्यं
हरि रखिलांतर चित्प्रभो ऽपि मायी ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

दुर्गाविलासः

अथ मथुरायां यद्वृत्तं त दुपवर्ण्यते

स खलु नरपते रुग्रसेन स्याग्रिमसूनुः समधिगतासुरप्रकृतिः कंसासुर-नामा अविनयदुर्विभाव्यगर्वनदांधकारपरिभूतविवेकदर्शनः परिहृत-कालनेमिकलेबरो ऽप्यपरिहृततद्वासनाजालपरिवेष्टितः निजपरिजनै रतिमन्दगतिर प्यमन्दगतिः देवक्या स्त्वष्टमो गर्भः कंसमृत्युरि त्य-शरीरवाक्यं श्रुत मनुसंदधानो वेपनो वसुदेवमंदिर मिंदिरासुन्दर माजगाम ॥

भागिनेयी मसौ दृष्ट्वा दुष्टात्मा तत्र मंदिरे ।
गृहीत्वा पाद मेतस्याः क्षेप्तुं भूमौ मनो दधे ॥
पदा संताड्य कंसं सा योगमाया सुदुर्णयम् ।
अंतरिक्ष गता विष्णो र्दुर्गा भूत्वा स्तुताऽमरैः ॥

दुर्गे दुर्गतिहारिणि त्रिजगतां सर्गादिसिद्धार्थके
स्वर्गा दीष्टफलप्रदाननिपुणे त्रायस्व न श्शंकरि ।
सा त्वं सर्वजनांतरांतर चिंद श्शानन्य सिद्धात्मिका
सारासारविवेकदृष्टिविदिता सर्वैकसाक्ष्यात्मना ॥

≡ अहिरी [कांभोदी] रागेण चापु [अट] तालेन गीयते ≡

जय जय दुर्गे जितवैरिवर्गे ॥प॥
वियदनिलादि विचित्रसर्गे ॥अ॥
सुन्दरतरचरणारविंदे
सुभिपरिपालितलोकबृन्दे
नन्दसुनन्दादियोगिवन्द्ये

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

नारायणसोदरि परानन्दे ॥
सरसमणिनूपुर संगतपादे
समधिगताखिल सांगवेदे
नरकिन्नरवर सुरबहुगीते
नन्दसुते निखिलानन्दभरिते ॥
कनकपटावृत घनतरजघने
कल्याणदायिनि कमनीयवदने
इनकोटिसंकाश दिव्याभरणे
इष्टजनाभीष्ट दाननिपुणे ॥
अनुदयलयसच्चि दानन्दलतिके
आलोलमणिमय तार्टकधनिके
नानारूपादि कार्यसाधनिके
नारायणतीर्थ भावितफलके ॥
इ त्यादिगीर्भि गीर्वाणगणै र्गीता प्रसाद्य तान् ।
सा वैष्ण वीति विख्याता त्रिषु लोकेषु पूज्यते ॥
दुरंतचिंताग्राहेण ग्रस्तो ऽयं कंसकुंजरः ।
अलब्धशरणो ऽस्वस्थ स्सदनं स्वीय मागतः ॥

इति शिवरामानन्दतीर्थपादसेवक श्रीनारायणतीर्थ विरचितायां श्रीकृष्णलीलातरङ्गिण्यां श्रीकृष्णप्रादुर्भाववर्णनं नाम प्रथमतरङ्ग स्समाप्तः ॥

—————

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

द्वितीय स्तरङ्गः

बाललीला कथा संग्रहः

नन्दगोप श्च गोप्य श्च यशोदा रोहिणीसुतौ ।
रामकृष्णौ तयो स्सम्यग्लालनं रामकृष्णयोः ॥
गर्गाचार्याभिगमनं तयो र्नामकृति स्ततः ।
पूतना शकटादीनां मर्दनं तदनन्तरम् ॥
नवनीतादिचौर्यं च यशोदायै निवेदनम् ।
यशोदया कृतं कृष्ण स्याह्वानं प्रणया न्मुहुः ॥
उलूखले दामबन्धो यमलार्जुनभंजनम् ।
यक्षाभ्यां च कृतं स्तोत्रं विश्वरूपप्रदर्शनम् ॥
यशोदया कृतं स्तोत्रं बालभावप्रदर्शनम् ।
इ त्येवं बाललीलायाः कथासंग्रह ईरितः ॥

नन्दयशोद दिभिः रामकृष्णयोः लालनम्

नन्दस्यागमनम्

≡ भैरविरागेण आदितालेन गीयते ≡

गौपै रनुगतो नित्यं गोबृन्दानि विचारयन्
गोपालकस्वामी नन्द गोपो महान् विराजते ॥

≡ मध्यमावतीरागेण आदितालेन गीयते ≡

वल्लवयुवतिकदंबं सभायाति वर मरुणाधरबिंबम्
शृंगारविलसित पृथुलनितंबं विख्यातविविधविलासविदंबं

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

कग्धृत दधिदुग्ध कमनीयफलजात
निरुपमसंतोप नीलकुन्तल मिह ॥

परं परस्मा दपि पाङ्क्तकर्म
क्रमेण वेधं करणै रवेद्यम् ।
निजेच्छया प्राप्तमनुष्यवेषं
सुतं यशोदा सुख माप दृष्ट्वा ॥

प्रभाते गोकुले नन्दगेहेगोकुलवासिनः ।
आविर्भावं हरे श्श्रुत्वा विविशु र्नन्दमंदिरम् ॥

अवतीर्णे भगवति गोकुलभूमिभागे तत्रत्यचन्दनमन्दार नागपुन्नाग चंपकाशोकपनस रसालप्रमुखाः कुसुमफलसंपदो दिव्यसौगंधगंधित-दिङ्मण्डलाः विगलितमाध्वी झरीसंचरन्मत्तमधुव्रत झंकारालंकाररम-णीय कुसुमफलभारानतशाखाभिः अवनीगताभिः अत्यन्तभक्तिनम्रा इव भगवतो वासुदेवस्य साष्टांगलक्षणं प्रणामं कुर्वाणाः तत्रत्य माधवीजातीमल्लिकादिलताः संततमंदपवनस्पंदनविगलितकुसुमभारैः अवतीर्णस्य श्रीभगवतो नारायणस्य परमप्रेमलक्षणं भक्ति मातन्वंत्यः पुष्पांजलिं समर्पयंत्य इव स्वकीयप्रार्थनया सुरभूसुरकार्यार्थि क्षीरमहो-दधेः गोकुल मवतीर्णस्य श्रीनिवासस्य संतोप यांतरानीत क्षीरसागर-पयोधरा धरेयं असंख्यातगोरूपध रेति साधुभि रुत्प्रेक्षिता गावः खगमृगनारीनरादयः सर्वे च जनाः संप्राप्तस्वस्वसंपदो बभूवु ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

अन्योन्यं व्रजनार्यो नन्द स्यांतःपुरे शिशुं दृष्ट्वा ।
इति जगु राविर्भूतं लक्षणत स्तद्धि वैष्णवं तेजः ॥

≡ कांभोदीरागेण आदितालेन गीयते ≡

श्रीपतिमिह नन्दगोपगृहेपरं ॥
मागतमाकलये अये सखि आगत माकलये ॥प॥
गोपकदम्बक गोगोपिकाबृन्द
तापसजनरक्षणाय श्रीपति ॥अ॥
परमपुरुषचिह्न मद्भद मवधारय
पद्मांकुशादिरेखं अये सखि पद्मांकुशादिरेखम्
परिपूर्णभावं प्रकटीकरोति दिव्य
पाणिपदाब्जगतं जगदार्तिहर ममोघम् ॥
पश्य प श्याधुना पादपबृन्दानि
विश्वस्य मे वचनं अये सखि विश्वस्य मे वचनम्
भृश मिव भूमौ दिशि दिशि सफलानि
भव्यसुगंधिकुसुमै रतिनिबिडानि जयन्ति ॥
अरविंदलोचने आविर्भवति जग
दतितरा मिह रमते अये सखि अतितरा मिह रमते
निरुपमानन्द नित्यबोधस्वरूपं
पर मनुगीत मिंद नारायणतीर्थ यतिना ॥

करिष्याम श्शिशो रस्य मंगलाचरणं वयम्
स्मरिष्यामः परं देवं लक्ष्मीनारायणं मुदा ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

=केदारगौलरागेण आदितालेन गीयते=

कलय कल्याणानि	नारायण ॥प॥
बलभद्रावरजाय	नारायण ॥अ॥
सरसिजनयनाय	सकललोकहिताय ॥
नरलोकसंभवाय	नारायण
शरदिंदुवदनाय	शतमन्मथसमाय
निरवधिकगुणाय	नारायण ॥
नन्दगोपसुताय	नगराजधीराय
सुन्दरचरणाय	नारायण
इंदिरामंदिराय	ईप्सितफलदाय
चन्दनादिगंधिताय	नारायण ॥
गुरुतरकरुणाय	गोकुलभूषणाय
परिजनपालनाय	नारायण
निरुपमसुन्दराय	नीलमेघनिभाय
परमपुरुषलक्षणाय	नारायण ॥
नवपल्लवकराय	नवमणिभूषिताय
कविजननायकाय	नारायण
अवनीवल्लभाय	आश्रितवत्सलाय
शिवनारायणतीर्थ	संसेविताय ॥

———

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

इ त्येवं गोकुलपुरवरनार्यः वासुदेव मशेषजगता मादिकर्तारं नाराय मवतीर्ण मजानंत्यः विष्णुमायाविमोहिताः मानुषशिशु मिव मत तस्यायुरारोग्यैश्वर्याभिवृद्धये कृतस्वस्त्ययनाः ततोऽन्य मिव नाराय प्रार्थयामासुः प्रा गेव वासुदेव स्संकर्षणस्त्यो रोहिणेयो गोपीि स्संवर्धित स्तत्रविहरति स्म ॥

गर्गाचार्यः बालकानां नामकरण महोत्सवकरणम्

अथ गर्गाचा र्यागमनम्

=[दरुवु] मध्यमावतीरागेण आदितालेन गीयते=

निर्गतमोहतिमिरे निर्मलमानसो नित्यं
स्वर्गापवर्गाधिकारी गर्गाचार्यो विराजते ॥

गर्गोपि निर्गतमोहतिमिरपटलो दिव्यदृष्टि स्तयो र्बलभद्रकृष्णानाम नन्देन किल कारयामास ॥

कंसेनप्रेरिता काचि त्पूतना शिशुघातिनी ।
कृष्णं स्तनंधयं मत्वा तस्मै स्तन्यविषं ददौ ॥
तद्भावं सर्वविद् ज्ञात्वा स्तन्यपानमिषेण ताम् ।
जघान साऽपन द्भूमौ दर्शयं त्यासुरीं तनुम् ॥
ततो दृष्ट्वा जगन्नाथं गोपबाल मिव स्थितम् ।
चक्रु स्स्वस्त्ययनं तस्य गोपगो प्यो ऽपि तं जगुः ॥

=नादनामक्रियारागेण जंपेतालेन गीयते=

मंगलानि तनोतु मधुसूदन स्सदा
गंगाधरो ऽपि तव सापि गंगा ॥प॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

शृंगारवारिधे श्रीवत्सकौस्तुभा—
लंकार शिशुभाव भयविभंग ॥अ॥
अस्तु ते भद्र मिह दुस्तरभवांभोधि—
विस्तरभयापहार वस्तुसुखद
कस्तूरिकातिलक विस्तीर्णफाल जग—
दस्तितापादक सदास्तरहित ॥
अक्षीणसंप दिह रक्षतु धरेय मथ
शिक्षतु हरि स्तव विपक्षनिचयम्
दक्षिणामूर्ति रपि दाक्षिण्य मावहतु
वीक्षतां त्वां सकलसाक्षि सदयम् ॥
दुर्गाणि वारयतु दुर्गासरस्वती
भर्गो ऽपि भंजयतु पापवर्गम्
सर्गादिसकल संसर्गसाधक मिह
मार्ग स्सदा ऽवतु त वापवर्गम्
परिपूर्णबोधरस परिपंथिहर सरस
निरवधिकसंपदं दिशतु भूमा
विरचित मिदं तु शिवनारायणानन्द
तीर्थेन परमपुरुषार्थफलिना ॥

——

सा खलु नन्दगोपमहिषी यशोदाख्या सकललोकाधार मनाधार मपरिमितमहिमान म प्यात्महिमान मवकल्प्य स्वांक मारोप्य विद्युत्पुंजमध्याभिव्यक्तनूतनजलधरव द्विद्योतमानं श्रीकृष्णं करकम-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

लाभ्यां मुखाभिमर्शनं कृत्वा भूतितिलककरणादिना प्याशीर्भि
स्संवर्धयामास ॥

निहते शकटे पद्भ्यां तृणावर्ते च मर्दिते ।
कृष्णेन विष्णुना सो ऽयं स्वस्थः क्रीडति बालवत् ॥

अथ जानुचराभ्यां रामकृष्णाभ्यां सह यशोदाया आगमनं गीयते

= द्विजावंतीरागेण आदितालेन गीयते =

नंदगेहिनी मन्दगामिनी
सुन्दरानना यशोदा सुरमोहिनी
नंदितामरी नीलकबरी मन्दं
मन्द मायाति मधुरभाषिणी
लोकनायकं योगितारकं
बालक मथ याति भगवन्तं कृष्णं
अंबुजाननं अब्जलोचनं
कंबुवर्ण मपि श्री रामनामानम्

अथ यशोदा सुत माह

सकललोकाधार सच्चिदाकार
प्रकटितागमजाल पद्माविलोल
अगणितगुणग्राम आत्माभिराम
मृगमदांकितफाल मित्रानुकूल
खगराजवाह नि गंत भवमोह
नगराजवरधीर नानाविहार

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

विकचवारिजनेत्र विस्फुरद्गात्र
शकलितासुरजाल शांत्यैकमूल
भगवन्भयापहार भक्तमन्दार
निगमशीर्षाराम नित्याप्तकाम
सकलसन्नुतगुण साधुसंत्राण
मकरध्वजाकार मंजुलहार
कलितकौस्तुभशोभ कालमेघाभ
बलभद्रकृतखेल बालगोपाल
मदनगोपाल सन् मानितशील
मुद्रमेहिदेहिसुत मुनिबृंदवंद्य
सारसाक्ष मुकुन्द सच्चिदानन्द
धीरनारायण तीर्थसुगीत ॥

— —

जानुभ्यां पाणिपद्माभ्यां व्रजन्तं नन्दनन्दनम् ।
आनन्दयन्त मबला स्सवलं परमं जगुः ॥

= मोहनरागेण (नवरोज़) चापुतालेन गीयते =

माधव माधव कृष्ण मंगलालय श्रीकृष्ण ॥प॥
साधकफलद कृष्ण सबल श्रीकृष्ण ॥अ॥
नंदनंदन मुकुंद सुन्दरमुखारविंद
नंदितगोपिकाबृंद नतजनानन्द
इंदिराहृदयानंद इन्दुवदन गोविंद

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

मंदरधर सुनंद वंद्यसानन्द ॥
दिव्यकस्तूरितिलक दीनजनपरिपालक
भव्ययोगिभयवारक भक्तोद्धारक
अव्ययभूतिदायक अगणितलोकनायक
नव्यनवनीतरसिक नन्दबालक
चारुनूपुरकोमल चरण बालचापल
सरससद्गुणजाल संगीतलोल
नीरदनील निर्मल नित्यशुद्धागममूल
नारायणतीर्थपाल नतजनालोल ॥

इत स्तत स्संचरंतं जगन्मोहनविग्रहम् ।
कराभ्या मथ जानुभ्यां लालयंति व्रजांगनाः ॥

≡ यदुकुलकांभोदिरागेण आदितालेन गीयते ≡

एहि मुदं देहि श्री कृष्ण कृष्ण
पाहि गो पालबाल कृष्ण कृष्ण ॥
नन्दगोप नन्दन श्री कृष्ण कृष्ण यदु
नन्दन भक्तचन्दन कृष्ण कृष्ण
कलभगतिं दर्शय श्री कृष्ण कृष्ण तव
कर्णौ चलय श्री कृष्ण कृष्ण ॥
धाव धाव माधव श्री कृष्ण कृष्ण नव्य
नवनीत माहर श्री कृष्ण कृष्ण ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

विक्रमबलं	दर्शय श्री	कृष्ण कृष्ण विधि
शक्रादि	सन्नुत श्री	कृष्ण कृष्ण ॥
भव्यनट	नं कुरु श्री	कृष्ण कृष्ण बल
भद्र स	होदर श्री	कृष्ण कृष्ण ॥
चंचलमणि	कुंडल श्री	कृष्ण कृष्ण चारु
चंपकनासा	मौक्तिक श्री	कृष्ण कृष्ण ॥
कुंकुमपं	किलदेह श्री	कृष्ण कृष्ण भक्त
शंकर	चरण श्री	कृष्ण कृष्ण ॥
साधु साधु	कृत मिह श्री	कृष्ण कृष्ण लोक
साधक	हिताय श्री	कृष्ण कृष्ण ॥
नारदादि	मुनिगेय श्री	कृष्ण कृष्ण शिव
नारायण	तीर्थवरद	कृष्ण कृष्ण ॥

—

विन्य स्यैकं भुवि भुवनभृत्पाद मेकं च हस्तं
मात्रा चानुप्रणिहित मथ स्वादु हैयङ्गवीनम् ।
हस्ते गृह्णन् सकलजगतां सारभोक्ता ऽह मात्मे
त्याचक्षाणो विहरति जगन्मोहनो नन्दसूनुः ॥

तथाविध मिह गोपरमणीचित्तमत्तमातंगमहनीयालानभूतं श्रीकृष्णं।
नन्दगोपमहिषी स्वसुत मिव लालयं तीद माह ॥

≡आनन्दभैरवी (तोडी) रागेण चापुतालेन गीयते≡

एहि मुदं मम देहि जगन्मोहन कृष्ण मां पाहि ॥प॥
एहि समाहित दीनजनावन मोहरहित मुनिमुक्तिवितरण ॥अ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

कमनीयकौस्तुभशोभ करकलित नवनीत धनाभ
समुदितगोकुलकलभ सर्व सन्मानयतिवर्यसुलभ
अमरेंद्रवल्लभ असुरसुदुर्लभ
विमतमदविभङ्गवीर पद्मनाभ ॥
चरणजानुकरै रलं ते बहुसंचरणेन गोपाल
करधृतनवनीतकबलं तव कर्दम माकुरु विमलं
परिपूर्णनिजकाम पातकगणभीम
वरनूपुराभरण वसुधाभरण ॥
कंकणकेयूरभूष कनक किंकिणीकृतबहुघोष
कुंकुमपंकिलवेष कुटिल कुंतलगोकुलभूष
किंकरहितकर कीर्तिसुधाकर
मंगलकर नारायणतीर्थतोष ॥
लालयंती यशोदा सा नन्दस्य महिषी सुतम् ।
चरंतं कर्दमभुवि त्वरया जगृहे हरिम् ॥

अयं हि परमात्मा परमप्रेमास्पदतया परमानन्दघनः स्वभक्तानुग्रह-चिकीर्षया स्वेच्छया प्राप्तगोपबालकविग्रहः शनै श्शनैः गोपबालै स्सह पङ्क्त्या मेव संचरन् अनन्तकल्याणगुणरत्न लीलाकल्लोलास्पद-तया अत्यन्तसौंदर्य रसजलनिधि रपारकरुणासुधानिधि रिह जयति भगवान् नन्दकुमारः तस्य नवनीतचौर्यादिलीलासक्तस्य सबलस्य चोरशिखामणेः आगमनं गीयते ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

== मुखारिरागेण आदितालेन गीयते ==

कृष्णं कलय सखि	सुन्दरं बाल ॥प॥
कृष्णं गतविषय	तृष्णं जगत्प्रभ
विष्णुं सुरारिगण	जिष्णुं सदा बाल ॥अ॥
नृत्यन्त मिह मुहु	रत्यन्त मपरिमित
भृत्यानुकूल मखिल	सत्यं सदा बाल ॥
धीरं भवजलधि	पारं सकलवेद
सारं समस्तयोगि	तारं सदा बाल ॥
श्रृंगाररसभर	संगीतसाहित्य
गंगालहरीखेल	संगं सदा बाल ॥
रामेण जगदभि	रामेण बलभद्र
रामेण समवाप्त	कामेन सदा बाल ॥
राधारुणाधर	सुधापं सच्चिदानन्द
रूपं जगत्रय	भूपं सदा बाल ॥
दामोदर मखिल	कामाकरं घन
श्यामकृति मसुर	भीमं सदा बाल ॥
अर्थं शिथिलीकृता	नर्थं श्रीनारायण
तीर्थं परमपुरु	पार्थं सदा बाल ॥

———

स खलु महानुभावो लीलया परिकलिताखिलांडकोटिब्रह्मांडनायको मधुसूदननामा व्रजपुरवरसुन्दरीपरिवेष्टितो वशीकृतमहामायोऽपि

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

मायापरवशो बालक इव लीलाविनोदं दर्शयन् कलभगमन कलभाषण कमलेक्षण मृदुमंदहासादिविलासैः निजपरिजना नानन्दन् सकललोक-संरक्षणे जागरूकस्सन् स्वकीयपरब्रह्मभाव मनुसंदधानो नन्दगोपमंदिरे नन्दसूनु रिव विहरति स्म ॥

व्रजभुवि नन्दकुमारे व्रजबालबृन्द कुमुदपूर्णेन्दौ ।
विहरति तस्य चरित्रं व्रजपुरनार्यो जगु यशोदायै ॥

≡ केदारगौलरागेण अटतालेन गीयते ≡

कलय यशोदे तव बालं खलबालकखेलनलोलं ॥प॥
अपहृत बहुतर नवनीतं अनुपम लीलानटनकृतं
कपटमानुष बालकचरितं कनककन्दुकखेलननिरतम् ॥अ॥
पथि पथि लुंठितदधिभांडं पापतिमिरशतमार्तांडं
अधिकबलोद्धृतजगदण्डं आनन्दबोधरस मखंडम् ॥
मल्लबालकखेलनचतुरं मनसिजकोटिलावण्यधरम्
कल्याणगुणनव मणिनिकरं कमनीयकौस्तुभ मणिशेखरं ॥
नवनीतचोर बालक चरितं नन्दादिव्रजपुण्यतरुफलितं
ध्रुवपदफलमेत दतिललितं भुवि नारायणतीर्थ यतिफणितम् ॥

——

अयि सखि यशोदे तव तु यशोदात्व मन्वर्थयन् भगवान् गोपबाल-परिवेष्टितो बलभद्रसहायः तत्र तत्र अशक्यसंस्पर्शोन्नतगृहनिबद्धेषु शिक्येषु संचितगोरसग्रहणोपायानभिज्ञान् गोपबालान्प्रति तदुपाय-निचय माचारत श्शिक्षयन् आरुरुक्षूनि वारूढयोगी तत्रत्यदधिदुग्ध-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

नवनीतादिक माकंठ मापी यान्या नपि पाययन् तत्रत्यगोपबाल-बिडालादिभ्यो निक्षिपन् क्वापि क्वापि करपल्लवकलितवेत्रादिना विरचितशिक्यभांडविवरा न्निस्सरंति दुग्धदधिधाराः स्वयं पिब न्नन्यानपि पाययन् भांडानि चास्फोटयन् विश्वात्मा नित्यसिद्ध विपुलतर परानन्दरसतृ प्तोऽपि स्वेच्छया परिगृहीतमूर्तिमत्तया गोरसपरितृप्तः स्वय मन्यांश्च तर्पयन् मुख्यप्राण इव वागादीनश्रांतो विश्रांतिस्थान मितरेषां निजानुचरै स्सहसानन्द मिह विहरति नन्दसूनुः ॥

वीथ्यां वीथ्यां व्रजभुवि सुखं संचरंतं मुकुन्दम्
मध्ये मध्ये घृतदधिपयः पाययन्तं पिबन्तम्
बुद्धौ बुद्धा वह मह मिति स्वांत माभासयन्तम्
भूयो भूयः सुत मनुनयं त्याह चे दं यशोदा ॥

== कांभोदीरागेण चापुतालेन गीयते ==

आयाहि माधव माधव हे कृष्ण आयाहि ॥प॥
संगमसमये ऽतीते सवितरि मध्य मागते
मंगलाचरोचिते त्वयि
अंगजसलिलावृते अधिकश्रमसंयुते
अंगजखेलनै रलं ते ॥
चन्द्रमंडलसमान चारुदधिखंडफेन
सांद्रनवनीताद्याहारं
मंदिरे मम गृहाण मंजुनूपुराभरण
सुन्दर सुखय सादरम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

पल्लवादतिकोमल पादपंकजयुगल
मल्लिकाजातीसुगंधित
फुल्लपंकेरुहदल भूरिनेत्र सुकपोल
वल्लवीमानसालंकार ॥
आलोलमणिकुंडल अनवद्य मौक्तिकजाल
बालभाव खेलनलोल
मलिनसुन्दरनाम नवनीताहारविलोभ
नारायणतीर्थ सुलभ ॥

इत्येवं प्रार्थयन्ती सा गोविंद नन्दनन्दनम् ।
यशसा पूरयन्त्येषा यशोदा सा नयद्गृहम् ॥
आनीय स्वगृहं बालं सबलं बालवत्सला ।
नीलमेघनिभाकारं यशोदा समतोषयत् ॥

यमलार्जुन भंजनम्

कदाचि दौद्धत्य मनन्तवीर्ये
हरौ विलोक्याप्रतिमं यशोदा ।
बबन्ध दाम्ना त मशेषबन्धु
मुलूखले बालविलासलोलम् ॥
आकृष्योलूखलं तस्मा द्यमलार्जुन मध्यगः ।
बभंज बलवान् कृष्ण स्ता वर्जुनतरू हरिः ॥
नारदमुनिवरशापा द्यमलार्जुनवृक्षभाव मापन्नौ,
यक्षसुतौ सविचिंत्र दाम्ना बद्धो ऽप्यमोच द्वन्धात् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अथ शापविमुक्तयो यक्षसुतयो रागमनं गीयते

≡ कांभोदिरागेण अटतालेन गीयते ≡

वृक्षभावबन्धमुक्तौ कृष्णेन यक्षसुता वनुरक्तौ
लक्षितविषयविरक्तौ सततं लक्ष्मीपतिपादभक्तौ
प्रक्ष णकल्मषभारतया हरि भक्ति सुधारसगिर मुद्गि न्तौ ॥

———

तं तुष्टुवतु रत्यन्तसंतुष्टौ दिव्यसुन्दरौ ।
कुबेरतनयौ यक्षौ दामोदर मरिंदमम् ॥

≡ कल्याणीरागेण आदितालेन गीयते ≡

दामोदर तावक पर भाव मह सदा जाने ॥प॥
श्यामधामन् भूमन् सामादि सर्वनिगम वासं जाने॥अ॥
पुण्डरीकपुरमध्य पुरुषभावेनसिद्धं
चंडभानुकोटिप्रकाशं चिद्घनाकाशं
पंडितपरिभावितं पापसंघविवर्जितं
खंडितमायाविलासं कारण मखंडरसम्
सत्यकामादिगुणकं सर्वहृदयाभासकं
नित्यमंगलनिवहं निर्गतमोहं
प्रत्ययबाधितशोकं प्रतिभातिसर्वलोकं
मृत्युजन्मादिविरहं सत्यलोकादिसर्वदेहम् ॥
कमलासनादिगीतं कामयानादिपालितं
श्रीमदशेषविभवं · धीरानुभाव्यं
समरसतया नित्यं विमलयोगिविदितं

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

अमररम्यश्रीगोकुल कमनीयगोपालशरीरम् ॥
नरकभयवारकं नामरूपनिर्वाहकं
परिपूर्णानन्ददायकं भक्ततारकं
सुरगुरुगीत मेकं सूदितासुरनायकं
वरनारायणतीर्थ वंदितपादपद्मकम् ॥

देवं ब्रह्मपुरांतस्स्थं पुण्डरीकांतरस्थितम् ।
चिदाकाशं जगद्बीजं वासुदेवं त माश्रये ॥

भगवति यमलार्जुनस्य भंगम्
कृतवति गोकुलवासिभि र्यशोदा ।
सपदि निजकृपाविमुक्तबन्धं
हृदि परिरभ्य चकार मंगलानि ॥

अथ कदाचि दरविंदलोचने भगवति वासुदेवे सबले गोपबाल
परानन्द सुधामहोदधि पूर्णशशांकबिंबे स्वकुक्षिपरिरक्षि तानेक
ब्रह्मांडनायके कृत्रिममानुषबालचापलेन संदर्शितमृद्भक्षणादि
सुचरिते विहरति तदीयलोलाविलसिततच्चरितं बलभद्रमुखा द
स्वकीयबालहितैषिणी दंडोद्यतकरा संताडयं तीव तत्सविध
यशोदाभया दिव मुखविदारणं कुर्वति तस्मिन् सकल
मात्मानं सविस्मय मालोकयामास ॥

कर्तारं सर्वलोकानां मायामानुषबालकम् ।
कुक्षौ संरक्षिताशेष मुच्चैः स्तौतीति सा हरिम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

= शंकराभरणरागेण त्रिपुटतालेन गीयते =

हरि मीडे श्रीहरि मीडे देवं हरि मीडे ॥प॥

गुरुतरासुर भारहर मह मीडे ॥अ॥

अखिलांडकोटि ब्रह्मांडनायक
मिह निखिलभुवनकर्तारं
प्रकटितनिजविश्वरूप मनामय
मघटितघटनाकारम् ॥

स्वर्गामिमस्तक सूर्यचन्द्रनयन विध्वस्तमोह महं
वर्धिताखिलवेदवात माशाश्रुति मनिलासु मखिलदेहम् ॥

विश्वहृदयदेश विपुलमहीचरण शाश्वतानन्दघनं
निश्वसितागम निर्मलविज्ञाननित्यकल्याणनिदानम् ॥

भक्तजनसमूहभद्रदं भवभयमुक्तममरमृदुगीतं
मुक्तसंगमुनींद्र मुक्तिदाननिपुणमूल मागमबोधितम् ॥

तरणिशशिमंडलकोटि कोटिभास्वर मरविंदभावकारणं
हरिभक्त शिवनारायणतीर्थकृत मिद मखिलपातकहरणम् ॥

———

गोविंद घट यानन्दं परमाम्नायगोचर ।
श्रीनन्दतन याशेषयोगिध्येय पदांबुज ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

≡ कांभोदीरागेण जंपेतालेन गीयते ≡

गोविंद घटय पर	मानन्दममृत मिह ॥प॥
श्रीनन्दतनय बहु	योगींद्रसुरविनुत ॥अ॥
अगणितगुणग्राम	अपरिमितनिजकाम
निगमपरमाराम	निखिलमोहविराम
नगधर घनश्याम	नतजनकुमुदसोम
अघहरण सर्वसम	असुरमंडलभीम ॥
परमपुरुषाशेष	पाल परिजनतोष
परिहृताखिलदोष	पतगवाहन शेष
पर्यंक मृदुभाष	परममंगलवेष
निरवद्यगोपपुरि	नियतवरमणिभूष ॥
नवमौक्तिकाहार	नन्दगोपकुमार
भवबन्धनविदूर	भद्रद सुखाकार
अवनतजनाधार	अपरिमितशुभचार
नवनीतचोर नर	नारायणावतार ॥
शरदिंदुसमवदन	शतमन्मथसमान
गुरुतरानन्दघन	कुन्दसुन्दरवदन
परिपंथिगणदलन	पालिताखिलभुवन
सरसनारायणतीर्थ	सत्यफलदान

———

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

इ त्येवं प्रार्थयन्तीं तां यशोदां नन्दनन्दनः ।
भूय स्संदर्शयामास बालभावं स्वलीलया ॥

इति श्री नारायणतीर्थ विरचितायां श्रीकृष्णलीलातरङ्गिण्यां श्रीकृष्णबाललीलावर्णनं नाम द्वितीयतरङ्गः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

तृतीय स्तरङ्गः

वत्सपालनावर्णनम्

अ थाभिनीयते कृष्णकृतं गोवत्सपालनम् ।
आदौ नन्द स्ततो गोप्यो बलभद्र स्ततो हरिः ॥

बलेन सह कृष्णेन वत्सानां पालनं कृतम् ।
कृते वत्सापहारे च ब्रह्मणा कृतसंस्तुतिः ॥

यज्ञपत्नीस्तुति श्चात्र संग्रह स्तु तृतीयके ।
नन्दाद्यागमनं पूर्वं गोपबालैर्बलेन च ॥

सहैवागमनं बालकृष्ण स्या थानुगीयते ।

नन्दगोप स्यागमनम्

≡मध्यमावतीरागेण आदितालेन गीयते≡

गोपै रनुगतो नित्यं गोबृन्दानि विचारयन्
गोपालकस्वामी नन्द गोपो मह न्विराजते ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अथ गोपीनामागनम्

≡मध्यमावतीरागेण आदितालेन गीयते≡

वल्लवयुवतिकदंबं आयाति वर मरुणाधरबिंबम्
शृंगारविलसित पृथुलनितंबम् विख्यातविविध विलासविडंबम्
करधृतदधिदुग्ध कमनीयफलजातं निरुपमसंतोष नीलकुन्तल मिहम् ॥

——

अथ बलराम स्यागमनम्

≡नादनामक्रियारागेण आदितालेन गीयते≡

हली बली च मुसली ललितांगद कुण्डली
नीलांबरी श्वेतरूपी बलभद्रो विराजते ॥

——

अथ श्रीकृष्ण स्यागमनं देवांगनाभि र्गीयते

≡हुशेनिरागेण आदितालेन गीयते≡

आलोकये श्री बालकृष्णं सखि
आनन्दसुन्दर तांडवकृष्णं ॥
नवनीतखंड दधिचोर कृष्णं भक्त
भवपाशबन्ध मोचन कृष्णं ॥
नीलमेघश्याम सुन्दर कृष्णं नित्य
निर्मलानन्दबोध लक्षण कृष्णं ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

चरणनिक्वणित नूपुर कृष्णं कर
संगतकनक कंकण कृष्णं ॥

किंकिणीजाल घणघणित कृष्णं लोक
शंकिततारावलि मौक्तिक कृष्णं ॥

सुन्दरनासामौक्तिक शोभित कृष्णं नन्द
नन्दन मखंडवि भूति कृष्णं ॥

कंठोपकंठशोभि कौस्तुभ कृष्णं कवि
कल्मषतिमिर भास्कर कृष्णं ॥

वंशनादविनोद सुन्दर कृष्णं परम
हंसकुलशंसित चरित कृष्णं ॥

गोवत्सबृंद पालक कृष्णं कृत
गोपिकाजाल खेलन कृष्णं ॥

नन्दसुनन्दादि वंदित कृष्णं श्री
नारायणतीर्थ वरद कृष्णम् ॥

नन्दसूनुरथ गोपसूनुभि
र्मंडितेन्दुवदन श्शनैः श्शनैः ।
ख्यापयन्नखिलदीनबन्धुतां
वत्सपालनविधौ स दीक्षितः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

असौ खलु भगवान् अपरिमितकरुणारसालवालो भूमाख्यो निजजनसंतापहरणप्रवीणः परिगृहीतगोपकुमारभावो वेणुविषाणनिनादविशेषैः उपवनपरिमिलितान् आगमभागवचोविलासै रिव परतत्त्वपरिमिलिता नशेषयोगिचित्तवृत्तिविशेषा निवाशेषगोवत्सान् निजकरकलितवेत्रसंचारविलासै र्नियमेन संचारयन् समुदितमहोत्साहसहसावलोकनभाषणादिभिः अखिला नपि गोपबाला नानन्दयन् वैमानिकवृंदनयनमहोत्सवो मोहातीतविशुद्धबोधमूर्ति रपि विहरति हरि रिह दीनबन्धुः ॥

वैमानिकाः परं तत्वं मत्वा गोपालनन्दनम् ।
परस्परं जगु र्भक्त्या गोवत्सानुचरं हरिम् ॥

=पन्तुवरालिरागेण रूपकतालेन गीयते=

कलयत गोपिका कारुण्यरसपूर कालमेघाभिरामं ॥प॥
चलदधरांचित चारुमुरलीनाद कलितकैवल्यकामम् ॥ अ॥
कुत्सितासुरतिमिर कोटिसूर्य ममरकुमुद कुमुदबांधव
मत्स्यकूर्मादि श्रीमहनीयाविर्भावं मायोल्लसितवैभवं
सत्सुखामृतजलधि सततखेलननिरतं साधुजनात्मदेवं
वत्ससंरक्षणं वात्सल्यपरिपूर्णं वल्लवबालभावम् ॥
अक्षीणसंपदा माश्रय मखिलसं रक्षणदीक्षादरं
पक्षीशवाहनं पंकजभवभव भावितभद्राकारं
कुक्षिस्थब्रह्मांडकोटिविराजितं कुटिलकुन्तलसुन्दरं
वीक्षणस्थमुदित विविधविश्वाकारं विमलविज्ञानसारम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

करसरोरुहगत कनकनिर्मितवलय कमनीयतरविग्रहं
गुरुतरमौक्तिक गुणमणिगणभारं गोपीसंतापापहं
सुरराजरिपुवत्सा सुरसूदनचरित सुललितमतिसुग्रहं
वरनारायणतीर्थ वरणीयपरमा र्थावरणमोहविनिग्रहम् ॥

— —

यज्ञं यज्ञभुजं विष्णुं गोपबालै स्समन्वितम् ।
दध्यन्नचूर्णशिक्याढ्यं जगु र्वैमानिका वने ॥

= भैरविरागेण त्रिपुटतालेन गीयते =

पश्यत पश्यत भगवन्तं गोप
बालकशिक्य मपहरंतम् ॥
रस्यधवलदधिमिलितान्नपूरित
रमणीयकलशविशेषाश्रितम् ॥
शर मारुत मानस सम वेगवन्तं
शतकोटि गोपबाल मपि लालयन्तं
सुरुचिर परिहाससुधा मुद्गिरंतं
सुरलोक वनितागण माकर्षयन्तम् ॥
शाखामृगलंवनानुकरणचतुरं
श्यामसुन्दराकारमतुलविहारं
अखिललोकाधार मिह वत्सानुचरं
अधिकसाहसोत्साहवीर्य मुदारम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

प्रणयकलहकोलाहल मतिसरसं
प्रकटितनिजपरमानन्द विलासं
क्वणितकिंकिणी घणंघणललितलास्यं
क्वापि क्वापि मधुमधुरगीतरसास्यम् ॥

सरसमसृणकबल मिह तु भुंजानं
सबलसकलगोप मखिलनिदानं
तरलकुंडलहार मतिनर्महासं
वरनारायणतीर्थ हृदयविलासम् ॥

आनीतं शिक्यभांडस्थं दध्यन्नं गोपबालकैः ।
भुक्त्वा वनेचरन् कृष्ण स्त्वघासुरमुखं-ययौ ॥

अघासुरमुखाविष्टा स्सवत्सा गोपबालकाः ।
प्राप्तमोहापनुत्त्यर्थं प्रार्थयन्तो जगु र्हरिम् ॥

परमकरुणया मां पलय त्वां प्रपन्नं
निजपरिजनकामं पूर याचिंत्यकीर्ते ।
निरवधिककृपाब्धे निर्मलानन्दमूर्ते
भयजलनिधिमग्नं दीन मुत्तार येश ॥

=सौराष्ट्ररागेण आदितालेन गीयते=

परमकरुणया मां पालय भक्तमनोरथं पूरय
परिपंथिगण मिह वारय भयसागरपतितं तारय ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

मधुकैटभादिविजयादर मत्स्यकूर्मादिरूपसादर
अधिकदयावलोकसुन्दर अपरिमितानन्द सागर ॥
अखिलांडकोटिपरिपालक अनवद्यगोकुलनायक
अघहरण दुष्टनिवारक आश्रितजनसमुद्धारक ॥
तरलमणिकर्णकुंडल तांडवनटनकृतमडल
सरसपरिपालिताखण्डल साधुगोकुलवरस्थंडिल ॥
अवनिमंडलभारखंडन आश्रितजनहृदयमंडन
ध्रुवविभूतिदानविचक्षण शिवनारायणतीर्थरक्षण ॥

एवं स्तुत स्सगोविंदः प्रवृद्ध स्त मघासुरम् ।
आस्फाल्य बालै र्गोवत्सै स्सह गोकुल माययौ ॥
कदाचि द्गोविंदे कलितमुरलीनादललिते
सरामे गोवत्सा न्वनभुवि सुखं चारयति वै ।
विधिस्तत्सौभाग्यं निरवधिक मालोक्य कुतुकान्
मुहु र्वत्सान् बाला नहर दजमायापरवशः ॥
हृतेषु वत्सबालेषु ज्ञात्वा विधिविचेष्टितम् ।
तन्मातृ स्तोषयामास स्वयं वत्सादिदेहभाक् ।

अथ ब्रह्मागमनम्

≡ नादनामक्रियारागेण आदितालेन गीयते ≡

आयाति चतुरास्यो ब्रह्मा सदसि
गाय न्गायन् ध्याय न्ध्यायन् विष्णुं चेतसि

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

दंडकमंडलुधारी दानववैरी
अंडब्रह्मांडविधा ताऽखिलजनयिता ॥

——

इत्थं भूतं हरिं दृष्ट्वा वत्सरांते विधि. स्वयम् ।
संदर्शितजगत्कोटिशरीरं स्तौति सादरम् ॥

≡कुरंजी (भैरवी) रागेण आदितालेन गीयते≡

जय जय गोकुलबाल जय सकलागममूल
दयया मां गोपाल दीनं पालय बाल ॥
देव मया चरित मिंद दीनधिया अपराधम्
श्रीवसुधाधव कृपया केवल मिह धुनीहि ॥
ईक्षे तावकदेहे ईश जगंति निरीहे
वीक्षाशिक्षितमोहे वेदांतागमगोहे ॥
जगदंडकोटितनो जगदुदरांतरसुतनो
अगणितसंजातमनो ह्यपरिमिताश्रितधेनो ॥
वितर म यीश्वर करुणां विघटय मोहावरणम्
सतत म्मे भव शरणं साधय संसृतितरणम्
इति विधिना परिगीतं श्रुतिवचसा हरिचरितं
यतिनारायणकथितं यदुकुलभूषणमुदितम् ॥

——

लीलामानुषदेहं लक्ष्मीशं त्वां प्रसादये देवम् ।
संसारार्णवपतितं कंसरिपो मां त्वमुद्धर त्वरया ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

≡ मोहन (रेगुप्ति) रागेण आदितालेन गीयते ≡

देव देव प्रसीद मे - देवकीवरबाल -
दीनजनपरिपाल ॥दे॥

लीलाविनोदविग्रह लक्ष्मीपते
बाल मोहविनिग्रह बालोन्नते
कलितसेवकानुग्रह कामाकृते
अलघुवीर्यपरिग्रह अखिलांडपते
अखिलमुनिबृन्दानुग्रह गोपाल कृष्ण
बाल घननीलातिसुशील हेमचलाऽनन्त
लीलागममूल श्रीलो लातिविशालफाल -
बालगोपाल कृष्ण ॥

श्रीवत्सलक्षणांचित श्रीभावित
देवगंधर्वसेवित दिव्यायुध
गोवत्सगणसंवृत गोपालवृत
अव्यय मुनिवंदित अचिंतित
भव्यगोकुलनिरत गोपालकृष्ण
पीतांबरवीत विधुशीताखिलताता घवि
घां तार्जुनसूतामर गीतागमजातभात -
बालगोपाल कृष्ण ॥

पूर्णेंदुमंडलानन पुरातन
पूर्णसुपर्णवाहन वरानन

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

तीर्णसंसारमोहन धीरायन
कर्णकुंडलशोभन कंजासन
वर्णितवीर्य वामन बाल गोपाल कृष्ण
नारायण धीरागमसा राघविदूरा सम
हा राविदा रामरवीरासंसारपार - बालगोपाल कृष्ण ॥

कर्पूराभौ कुवलयदलश्यामलौ चाभिरामौ
कल्याणानां सकलजगता माश्रयौ गोपबालौ ।
भक्तत्राणाध्वरवरविधौ दीक्षितौ मोक्षहेतू
मायाशक्त्या विरचिततनू रामकृष्णौ स्मरामि ॥
भगवन्त मिति स्तुत्वा विधिः स्वं धाम सत्वरम् ।
हरिणा गुरुणा ज्ञातो ययौ कृष्णो ऽपि गोकुलम् ॥

अथ याज्ञिकाना मागमनम्

=सौराष्ट्ररागेण आदितालेन गीयते=

अरणिपात्रपालाशकुश भारं वहंतो
धरणितले सततं धावंतो याज्ञिका आयांति
पवित्रपाणयो नित्यं पशुलक्षणविदो
सवितृमंडलांतस्थं ध्यायन्तो याज्ञिका आयांति
अहंपूर्व महंपूर्व मिति यज्ञकुशलाः
गहनकर्मसामादीनि गायन्तो याज्ञिका आयांति ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

अथ यज्ञपत्नीना मागमनम्

≡ यदुकुलकांभोदिरागेण आदितालेन गीयते ≡

यज्ञपत्नीबृन्द मधु नायाति यागशाला मनिंद्यकर्मविधिना
विज्ञानपूरित शुद्धमनसा सह विश्वासपूर्वक नम्रशिरसा
दिव्यसुन्दरं भव्यकन्धरं धृतनव्यपीतांबर मद्भुतहारम्
चारुकबरीभारभरितं दिव्य चामीकराभरण गणभासितम् ॥

एवं यज्ञपत्नीसहित यजमानयाज्ञिकप्रवर्तिते यज्ञकर्मणि साक्षा यज्ञस्वरूपीभगवान् कन्दर्पदर्पमहासर्पगरुडायमान दिव्यमूर्तिधरो गोप-बालैस्सह शनै श्शनै स्संचरन् चारय न्नपि गोवत्सान् तदुपवनदेश माजगाम तत्र कदाचि द्वत्सपालनसमये बाला ऊचुः ॥

वय मिह विचारमो ह्यन्न माकांक्षमाणाः
कथ मिह भगव न्नो बालकाना मि हान्नम् ।
इति वनभुवि पृष्टो बालकै र्बालकृष्णोऽ
प्यवद दिह च भूया दन्न मत्यन्त मृष्टम् ॥
यज्ञशा लेय मस्माभि रत्रै वान्नं हि लभ्यते !
गच्छ पृ च्छेज्यशालायां यजमानं च यज्ञिकान् ॥
यदि तेन प्रयच्छंति याच स्वान्न मशंकितः ।
तत्पत्न्यः प्रतिजानंत्यो दास्यं त्यन्नानि ताः स्त्रियः ॥
याज्ञिकै र्यजमानेन प्रत्याख्यात श्च तै र्द्विजैः ।
ययाचे यज्ञपत्नी स्ताः कृष्णार्थे गोपबालकः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सकृच्छ्रवणमात्रेण स्वाद्वन्नानि बहू न्यपि ।
आदाय ताः परं कृष्णं मुक्तसंगाः प्रदुद्रुवुः ॥

तत्र गत्वा तु गोपालं गोपीजनमनोहरम् ।
भोजयित्वा ऽथ संतुष्टं विहिताञ्जलयोऽस्तुवन् ॥

= मोहनरागेण आदितालेन गीयते =

ब लगोपाल कृष्ण	पाहि पाहि ॥प॥
नीलमेघशरीर	नित्यानन्दं देहि ॥अ॥
कलभसुन्दरगमन	कस्तूरिशोभितानन
नलिनदलायतनयन	नन्दनन्दन
मिलितगोपवधूजन	मीनांककोटिमोहन
दलितसंसारबन्धन	दारुणवैरिनाशन ॥
यज्ञ यज्ञसंरक्षण	यादववंशाभरण
यज्ञफलवितरण	यतिजनशरण
अज्ञानघनसमीरण	अखिललोककारण
विज्ञानदलितावरण	वेदांतवाक्यप्रमाण ॥
व्यत्यस्तपादारविंद	विश्ववंदितमुकुन्द
सत्याखंडबोधानन्द	सद्गुणबृंद
प्रत्यस्तमितभेदकन्द	पालितनन्दसुनन्द
नित्यद नारायणतीर्थ	निर्मलानन्द गोविंद ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

यज्ञपत्न्य स्त मीशानं लीलागोपालविग्रहम् ।
प्रसादयंति यं वेदा स्तात्पर्ये णामनंति ते ॥

≡मोहन (रेगुप्ती) रागेण अटतालेन गीयते≡

बालगोपाल मा मुद्धर-कृष्ण परमकल्याणगुणाकर ॥प॥
नीरदनीलकलेबर कृष्ण निरुपमकौस्तुभकन्धर ॥अ॥
नंदनंदन भक्तचंदन-सुर बृन्दरचितबहुवन्दन
मंदस्मितसुन्दरानन-कोटि मदनसुन्दरजगन्मोहन
इंदिरामंदिर भक्त सुन्दरहृदयारविंद
भृंग भक्तिमकरंद नंदितगोपिकाबृन्द ॥

तां ताहतधैदत्तत्तां-तक्कतो धिम्मिणांगिणतो धिम्मिरे-तक्कत्तो थिम्मि-
धिमिकिटतोधिम्मिरे-तक्कतोदिगिणांगंगिणत्तों गधिंगुड्डदर्दिगुड्डद-
त्तुंग तोधिगिणंगत्तिरुत्तोंग-दिर्गुड्ड दधिकितकिहददिगिणतां-
बालगो ॥

यज्ञादिकर्मफलप्रद-कृष्ण यदुकुलजातसुखप्रद
यज्ञसंरक्षणदीक्षित-कृष्ण यतिजनमुक्तिदसुव्रत

ताधैय्यधैधत्तथा - किटतकतत्किण्णंकिण्णं - तरिकिट तरिकिटधिमि
धिंधिंधिमिकिट - तोंगिटकिटत्तोंगतोंगिण - किणकिण घरिघरि
कुन्तकतक - दिर्गुड्डतकतकदिर्गुड्डतक - गणपतिगुरुश्रीपति षण्मु
ख-जयजयजय - झंतरिकिटतकतत्तोंगिटतोंग - तकगिणदिनहत

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

धिमितातांधां - तकदिर्गुड्डतकदधिगिणतों-दिनहतधिमितातांधां-
तकदिर्गुड्डतकदधिगिणतों ॥

चिंतितजनचिंतामणिगण संततसुखसंतानप्रद
मन्दरधरमंजुलमौक्तिक नंदितजन नन्दात्मज वर
वृंदावनवृन्दारकगण वंदितपद वसुदेवात्मज

जयजयजय - झंतरिकिटतकतत्तोंगिटतोंग - तोकगिणदिनहतधिमि
तातांधां - तकधिर्गुड्डतकदधिगिणतों - बालगों ॥

अन्नमयादिषु पंचसु त्वा - मन्तर मानन्दविग्रहं उन्नतफलमामनंति
ते जग-दुदयलयादिषु लक्षित तद्धि त्व मेवासि तद्धित्व मेवासि
तत्सर्व मेत त्वमेवासि नूनं दुत्तुङ्गमुक्तामणि प्रस्फुरद्दिव्य - मत्तेभव
द्योगिचित्त स्फुरंतंनृत्यन्त मत्यन्त मानन्द मीडे - हिंत त्वा महं
त्वामहंत्वामहं तधितकुकुदकुकुततत्तकुकुधिकुकु - तत्तत्तोंगुतकिट
किटकुधरिकिटततोंग - किट्टकितकिटदधिगणतों - बालगो ॥

संतत मंत रवस्थितं - हृदि सत्यविज्ञानसुखाकृतिं
अंतर्यामित योदितं - योगिचिंतित माकलयामि तं

तधिर्गुड्डधत्तां - तत्तधिर्गुड्डधत्तां - किडतकतत्तरिकितत्तरिकिदोगुड्डदो
गुड्डत्रकधोंधों - कुंदकिटकिटधरिकिकुन्दत्तकुकुधरिकि - ढेकुढेकु
कुधरिकिढिक्कप्रभेद मिह - झेकुझेकुजझुणजयशील नटन मिह -
सकलजगदादिं सकलमुनिगीतं

सकलनिगमांतजनितांत मतिविदितं
तं परमयोगिगणचिंतित मखंडसुख

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

संपद मपारमहिमान मणिमान मिह
रंगत्तुरंगमातंगवरहंसगति
मंजीरमंजुरटनट मखिलरंजनं
तधिंततधिंततकिटधिमिधिमिधिमितधीतकिट-धिमितकिटधिमितकिटहं
तधीं-ताहत्तधींताहत्तधिन्नां - ताहत्तधीं - धिन्नाधिन्नाहत्ततांधिन्ना
धिन्नधीं- ताताधिन्नधीं- तद्धिन्नतकधिन्नताहत्तधिनां कत्तरिडिकत्त
रिडिकाहुरेकाहुरे-कंजरिडि कंजरिडिदेहुरेराहुरे
संगीतसाहित्यविद्याविनादपर गोविंदगोपाल
गोपीमनोहरे मतिरस्तु रतिरस्तु मंगलं भवतु मम
तधिंततधिंततकिटधिमिधिमिधिमित - धीतकिटधिमितकिटकिड्तकत
किटदांधिगणधां-बालगो ॥
तारकसममुक्तहारकं भक्त-कारुण्यरसपूरधारकं
नारदमुनिक्षेमकारकं-धीर-नारायणतीर्थतारकं
तांताहतधणतांधणांधणतां-धण्णांधण्णतां
तद्धिम्मितद्धिम्मिताण्डवालोलं-रिंझिरिंझिरिंघणराधालोलं
कुन्दकिटकिटधरिकिगोपिकाजारं-नगधरं तोधित्तनवनीतचोरं
त्वामहं कलयामि धीर मनामयं सकलकामदं भुवि
संतत मानन्दताण्डवालोलं - सद्गुणमणिगणभूषणजालं
सुन्दरगोकुलबालगोपालं-सत्यप्रतिज्ञसंतानगोपालं
विख्यातसत्कीर्तिविजयगोपालं - मन्दस्मितानन्दमदनगोपालं
कन्दर्पकोटिकल्याणगोपालं - भक्तजनबृन्दप्रसन्नगोपालं

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सिद्धजनसिद्धांतसिद्धगोपालं - मत्स्यावतारादिमहिमगोपालं
तं त्वा महं त्वा महं

तद्धितकुकुधिकुकुतत्ततकुकुधिकुकुनत्त - तोंगुतक्किटकिटकु धरिक्किटत धोंग - किड्तकिटतक्किटदधिगणधों - बालगो ॥
धैधरिकिटतहंधित्ता- जेजेझन्तरिदिगिधिगिदित्ता- दित्तरिदिगिदिगु ड्डुदिगिदिर्गुड्डुदित्ता - तदिंमितोदिमितोंगिटदित्तातत्तोंतत्तोंगक्किटत तक्किट - धणधणतदिमिहिण्णं - धलंगुतकतकददिगिणधोंस्वामिंन विचित्रवनमालिंन-पतत्रिराजगामिंन परिपालितगोधनं- भुजगपति शायिंन - सदानन्ददायिंन समस्तवेदसाधवं - सनातन - बाल गोपालकं - भजामि

रेहुरेहुरेरिंखणरिंखण - काहुकाहुरेकंजरिकंजरि - झेकुझेकुरोझणतज्ज गगिण - ढेकुढेकुरेढिंकुकुढिंकुकु - झन्झझन्झरिहरिटकुमुरिंखण - तक्किटक्किटतकदिक्किटकिटतक - तोंगिटक्किटतकनंगिटकिटतकतहततह तदिमित - धणेकुदधिगिणतों ॥बाल॥

स्तुत्वा तं यज्ञपुरुषं यज्ञपत्न्य स्तदाज्ञया ।
पुनः प्रविविशु र्यज्ञशालां तद्गतमानसाः ॥

याज्ञिका स्तेऽपि ताः पत्नीः प्रशस्य च पुनः पुनः ।
अंगीचक्रु र्भगवतो माहात्म्या द्गतकल्मषाः ॥

इति श्रीनारायणतीर्थ विरचितायां श्रीकृष्णलीलातरंगिण्यां
श्रीकृष्णगोवत्सपालनवर्णनं नाम तृतीयस्तरङ्गः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

चतुर्थ स्तरङ्गः

कथासंग्रहः

गीयते रामकृष्णाभ्यां कृतं गोपालनं ततः ।
नन्दाद्यागमनं पूर्वं ततश्च बलकृष्णयोः ॥

कालीयमर्दनं नागपत्नीस्तोत्रं ततः परम् ।
खरासुरवध श्चाथ प्रलंबस्य च मर्दनम् ।
दावाग्निभक्षणं बालस्तुति रत्र निगद्यते ॥

अथ नन्दस्यागमनम्

≡सौराष्ट्ररागेण आदितालेन गीयते≡

गोपै रनुगतो नित्यं गोबृंदानि विचारयन्
गोपालकस्वामी नन्द गोपो महा न्विराजते ॥

——

अथ बलभद्र स्यागमनम्

≡सौराष्ट्ररागेण आदितालेन गीयते≡

हली बली च मुसली ललितांगदकुंडली
नीलांबरः श्वेतरूपी बलभद्रो विराजते ॥

——

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अथ श्रीकृष्णागमनम्

≡ नादनामक्रियारागेण आदितालेन गीयते ≡

शंखी स चक्री गदी पद्मी शार्ङ्गी किरीटकुंडली
श्रीवत्सकौस्तुभी दिव्य पीतांबरो विराजते ॥

— —

≡ नादनामक्रियारागेण चापुतालेन गीयते ≡

पाहि पाहि जगन्मोहन	कृष्ण	परमानन्द	श्रीकृष्ण ॥
देवकी वसुदेव नंदन	कृष्ण	दिव्यसुन्दर	श्रीकृष्ण ॥
नन्द यशोदा नन्दन	कृष्ण	इन्दुवदन	श्रीकृष्ण ॥
कुंदरदन कुटिलालक	कृष्ण	मन्दस्मित	श्रीकृष्ण ॥
किंकिणिरचित घणघण	कृष्ण	क्रीडालोल	श्रीकृष्ण ॥
कुंकुम पंक विंरकिल	कृष्ण	गूढमहिम	श्रीकृष्ण ॥
चंचल झलझलनूपुर	कृष्ण	मंजुलवेष	श्रीकृष्ण ॥
तरलित कुंडलमंडित	कृष्ण	तांडवलोल	श्रीकृष्ण ॥
धिक्कृत सुररिपुमंडल	कृष्ण	दीनपालक	श्रीकृष्ण ॥
साधु साधु नटवेष	कृष्ण	सत्यसंध	श्रीकृष्ण ॥
पालित नारायणतीर्थ	कृष्ण	परमपावन	श्रीकृष्ण ॥

— —

बलरामकृष्ण गोपालनकरणम्

अथ कदाचि देतौ नन्दकुमारौ- निर्मलनिरुपमरजतांजन शिखरि-शिखरसमुत्तुंग दिव्यमंगलसुन्दरांगौ- दुर्विनयदुर्वार्यगर्वपर्वत विषय-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

विपिनसंचारि महासुरमत्तमातंग महोदारकेसरिणौ- संततसमुल्लसित-कमलकुशेशय कुमुद कल्हारादिकुसुमसौरभ्यसौभाग्य भोगसमुन्मिष-दानंदानुभवदिव्यदर्शनैः हंस कारंडव सारस चक्रवाकादि विविध-विहंगमै रनुदिन मुदितमहोत्साहसाहससमृद्ध समुच्छृङ्खलकलरवाव-बोधित निजनंदावधीरित ब्रह्मलोकादिसुखै र्निजतटसमागतसुरविटपि-वृंदैश्च संततपरिशोभमानायाः कालिंद्या स्तटभुवि पर्यटन्तौ- करतल-कलितवेणुविषाणवेत्रौ - निरवधिककृपावलोकन हासपरिहासविलासै र्निजपरिजना नानंदयंतौ- सकललोकपालका विह गोपालौ बभूवतुः ते च गोपबालाः तदीयविलासापन्नसुधारस माकंठ मापी यात्यन्त-तृप्ततया समुद्गिरंत इव भगवदनुग्रहप्रतिबोधितसकलकला स्तदीय-कल्याणगुणगणा नित्थं गायंतो वनभुवि सुखं चेरुः ॥

≡मध्यमावतीरागेण आदितालेन गीयते≡

कलय वनभुवि कामगतिं - कलभगमन मखिलात्मरतिं ॥प॥
रजतशैल शिखरोपमकायं - रमणीय मिह रामनामधेयम् ।
सकलजलद रुचिरं गतमायं - सकलवल्लवीजन भागधेयम् ॥
ललिततर मुरलीनाद विनोदं - लावण्यरसपूर सरिदास्पदम् ।
अलिकुलमिलित तुलसीबृंदमोदं - आनन्दनटन सुन्दरपादम् ॥
दिव्यत्रिभंगि ललिततर गात्रं - देवादिविरचित नुतिपात्रम् ।
भव्यकरकमल कमनीयनेत्रं - भास्करकोटि प्रभंजनमित्रम् ॥
सकृदवलोकन कृतजगदण्डं - सरसकुंडलशोभि मृदुगंडम् ।
प्रकटित ब्रह्माण्ड शतकोटितुण्डं - प्राकृतासुरतिमिर मार्ताण्डम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

रवितनयातट सुघटितखेलं - रक्षितसकल गोकुलबालम् ।
नवरसपरिपूर्ण गानविलोलं - नारायणतीर्थ गीतसुलीलम् ॥

गोविंदानुचरा स्सर्वे गोविंदासक्तचेतसः ।
गोविंद मनुगायन्तो सानन्दं ननृतु र्वने ॥

कालीयमर्दनम्

विना तु बलभद्रेण कृष्णो गोपालकैं स्सह ।
कालीयस्य ह्रदं गत्वा न्यपत त्तज्जले बलात् ॥

कालीय स्तद्ध्वनिं श्रुत्वा क्रोधसंरक्तलोचनः ।
बबन्ध कृष्णं भोगेन ददृशु स्तं व्रजौकसः ॥

पश्यत्सु नंदादिषु गोपिकासु श्रीकृष्ण मेवाखिलमित्रभूतम् ।
तुष्टाव राम स्सकलात्मदर्शी सर्वात्मकं कृष्ण मनन्यदृष्ट्या ॥

== कर्णाटसारंगरागेण अटतालेन गीयते ==

बन्धना न्मोचय - कालीयकृत - बन्धना न्मोचय ॥प॥
बन्धना न्मोच यात्मान मनुपम
बल मनुस्मर तावक मधुना ॥अ॥

कारणं जगता मघौघवि - दारणं हि भवान्
दुरिताशेषशोक महीभार
वारणाय कृतमानुषवेष श्रीकृष्ण ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

बालचापलतया त वानघ - लील याल मिह
कालीयविष माशु विनाशय
कलय गोकुलकल्याण मथ भो ॥

नन्दगोपमहिषी त वेय मनिंदनी जननी
नन्द मेन मानंदय ता मपि
नन्दनन्दन सुन्दर श्रीकृष्ण ॥

कृष्णतत्त्वविदागीत मिति - वृष्णिजनमुदे
विष्णुभक्त शिवनारायणतीर्थ
विरचितं विपुलानन्द मुदितम् ॥

— —

रौहिणेयकृतं गीतं श्रुत्वाऽऽस्फाल्य च कालियम् ।
पातयित्वा जले नृत्य मकरो त्तस्य मूर्धनि ॥

अथ नागपत्नीना मागमनम्

=नादनामक्रियारागेण आदितालेन गीयते=

आयाति नागदारकदम्बं प्रति
मायाकलित लोकलोककदम्बं
नन्दादि योगिवृन्दार्चित्यपादं परमा-
नन्दैककन्द माश्रितवेदम्
फणिफणासमर्पित पादारविंदं नित्य
मणिमादिभूतिद मखंडितानन्दं

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

कमनीय कालमेघाभिरामं गोप
कामिनीबृन्द कलितकामम्
नानाविचित्र लीलाविनोदं श्री
नारायणतीर्थाभयवरदम् ॥

फणेषु तस्य नृत्यन्तं क्षीणशक्ते र्मुहु र्मुहुः ।
भर्तृभिक्षां प्रार्थयन्त्यो नागपत्न्यो जगुर्हरिम् ॥

≡मुखारिरागेण आदितालेन गीयते≡

देव कुरु शिक्षां	देहि पतिभिक्षम् ॥प॥
दीनपरिपालनाय	स्वीकुरु दीक्षां ॥अ॥
आगमैकशरण	मशेषलोककारणं
आहु रागमेन तत्त्वा	मानन्द मखंडितम् ॥
योगिमतिभूषणा	घौघ परिशोषण
भोगिशयन भुवन	भूष पाहि पतितम् ॥
जातिकुलशरण म	शेषजंतुतारणं
जातं भवताकृत	मि त्यागमविदितम् ॥
सर्वजन्तुसमता	साधु तव विदिता
सर्वबुद्धिषु प्रहिता	सा च वेदविदिता ॥
अज्ञातवस्तु कि	मस्ति विज्ञानस्य ते
आज्ञापय य दुचित	मस्माकं जगत्प्रभो ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

नागपत्नीगीत मिदं नारयणचरितं
योगिवर नारायण तीर्थयति फणितम् ॥

एवं स्तुते जगन्नाथे नागपत्नीभि रादरात् ।
नम स्ते देव दे वेति फणी प्राह शनै श्शनैः ॥

श्रीकृष्णः कालीयं रक्षयति

श्रीकृष्ण स्तं परित्यज्य सागरं गच्छ निर्भयः ।
मत्पाद चिह्नितफणै रि त्युक्त्वा गोकुल ययौ ॥

खरादिराक्षसहननम्

परं गोपबालै महत्तालबृंद
क्रमेण प्रविष्टौ खलान् संहरंतौ ।
मुदा रामकृष्णौ सखेलं चरंतौ
फलै स्तोषयामासतुर्गोपबालान् ॥

खरासुरवध कृत्वा खगाधिपतिवाहनः ।
निरायासः परानन्दो रमते नन्दनन्दनः ॥

त मेव मसुरकुलकदलीवनोन्मूलन केलिकलाकुशलकलभमूर्तिधरं नंद-कुमारं सर्वे च गोपबालाः संपूर्णमनोरथा इत्थं प्रार्थयामासु ॥

≡कांभोजीरागेण त्रिपुटतालेन गीयते≡

राम सखे कृष्ण सखे रमणीयगोकुल मथ यामो ॥प॥
कमलबन्धु रिह कमल मनुपतति कमलिनी मलि नेव
विभाति कुमुदबन्धु रपि कुमुद मनुसरति कुमुदिनी च परं परिहसति॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

शशधरं शनकै रनुपश्यति शर्वरी वनिता निजकांतम्
वश मुपैति वनिता झषबृन्दं वाममन्मथदाशस्य मन्दम् ॥
अलिकुलं कमलोदरमिलितं अलघुगीत रसामृतभरितं
कलय गोधन मिह समुदित ललितवेणुरवेण त्वरितम् ॥
रक्तचन्दनलेपनलोला रागिणी पश्चिमा भाति बाला
मुक्तलज्जेव मुहु रतिचपला मुंचति वीटिकारस मबला ॥
चक्रवाकयुगलं च विगलित चारुनीरनिरंतर मिलितं
वक्रकंठविगलित रवललितं वनजबृन्द मधुनैव मुकुलितम् ॥
वारुणीसेवना दब्जमित्र वारुणां नीतवा न्निजगात्रं
तारकामल निजदन्तकांत्या तामसी हसतीति विचित्रम् ॥
शृण्वता गोपबालकगीतं श्रीधरेण गोकुल मायातं
तृणचरानुसरेणसमुदितं धीरनारायणतीर्थ सुफणितम् ॥

उषित्वा गोकुले रात्रौ बलेन सहितः सुखी ।
उष स्युत्थाय गोविंद श्चोदयामास गा वनम् ॥

भाण्डीरक वन वर्णनम्

अद्यभांडीरकं नाम वनं यामो वयं मुदा।
इ त्याह भगवा न्बालान् बलं च बलिनां वरम् ॥

=सावेरीरागेण आदितालेन गीयते

राम राम विचरामो वयं - रम्यभांडीरक वन मधुना ॥प॥
राम रविकिरणदूरं - रमणीय सरोवरबहुलम् ॥अ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

चन्द्रकांतोपल मणिवालुक - चारुतर झरीसुन्दर सलिलं
चन्दन चंपक तरुमन्दार - च्छायातिमिरसूर्य मणिजालं॥

उन्नत तरुषु समुन्नतबलव - त्पन्नगरिपु मुखनिर्हुतविहगाः
उन्मत्ता इव सन्नद्धा युधि - मन्यन्ते मुहु रिह खलु योद्धुम् ॥

नन्दनवन मेत दुपमितं - नानारसफलै रपि मधुसुधया
मन्दमारुत स्पन्दनविगलित - मन्दारादि श्रीचन्दनकुसुमैः ॥

मुक्ताफलसम मुद्रितवल्ली - सक्तमधुव्रत शंसितविभवम्
त्यक्त्वा शंस द्दिवि वन मेतत् - चेत स्स्पृहयति दिव्यवधूनाम् ॥

स्वर्गारोहण सोपानपंक्तिरिव - सुरलोकावधि सुन्दरविटपाः
निर्गलितोपम मतिरमणीयं - निर्हुत सकलसंतापविभूति ॥

बन्धुप्रिय इव बन्धू नय मिह - संधत्ते खलु सादर मस्मान्
मन्दस्मेर सुधामधुसेचन - मंगलपूर्व महो वनदेशः ॥

नारायण फणिंत रमणीयं धीरोदात्तगिरा बलभद्रम्
घोराघौघनिवारण मेत - न्नारायणतीर्थार्यै सुघटितम् ॥

गायन् गायन् वनभुवि शनै र्गोपबालै स्समेतो
देयं देयं करतल मिति प्रीतित स्ताडयं स्तत् ।
पायं पायं सरसवचनाह्लाद पीयूषधारां
सो ऽयं मायी विहरति मुहु र्नादय न्वेणु मीशः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

प्रलंबाघबकादिवधः

क्रीडा मारब्धवान् कृष्णो जयशीलान् पराजिताः ।
स्कंधे वहंति यस्यां तां बालकै स्सह संभ्रमात् ॥

प्रलंबो नाम गोपालवेषधारी महासुरः ।
पराजितो रौहिणेयं स्कन्धे नोढ्वा पलायितः ॥

संकेतस्थान मुल्लंघ्य पलायनपरो बलः ।
मां नय त्वेष किं कार्यं वद कृष्णे त्यभाषत ॥

वीर्य मावेदयन् कृष्णो बलभद्रस्य धीमतः ।
इद माह महावीर्यं मार्यं बलसमुन्नतम् ॥

≡कापीरागेण अटतालेन गीयते≡

तावकं परभाव मनुस्मर - तारकं स्मरताम् ॥प॥
सेवकसंकल्पसिद्धतनोपर - दैवतनरभाव भावन यालम् ॥अ॥

स्मर तवातुलबल मतिवीर्यं साह -
सं च बलभद्रगांभीर्यं
नरवपुर्धर मसुर मिमं जहि -
नगवराधिक धैर्यदुर्वीर्यम् ॥

खेलने समयो नाय मिह बल -
नीलांबर तव भो
तालनिकेतन ताडय कुटिलं तव -
खेलनमिव मवरशत्रुभृत्यम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

अघटितं घटयति तव माया -
अखिललोकजननी
विघटित भवबन्धमूल मोहनिबद्ध -
विपुलबोधानन्दरसघन जय भो ॥

लोकबन्धुफणित मेतदाश्रित -
शोकमूलहरणं
भक्तसंसिद्धिसाधक श्रीहरि -
भक्तनारायणतीर्थ भरणम् ॥

जघान बलभद्रस्तं श्रीकृष्णेन प्रचोदितः
प्रलंबं मुष्टिना मूर्ध्नि प्रलंबोऽपि पपात च ॥

अघासुर बकासुर प्रमुख कंसवृतासुराः
हता स्तु हरिणा गुणव्यतिकरप्रसूताः खलाः ।
वने विचरता घने वकुलमंजरीपुंजका
स्रवन्मधुझरीचर न्मधुपकामविद्यागुरौ ॥

दावनलभक्षणम्

दृष्ट्वा दावानलं बालाः कृष्ण कृष्णेति चक्रुशुः ।
गृही त्वांजलिना कृष्णो दावानल मभक्षयत् ॥

जीर्णे दावानलो यस्य जाठरेण महात्मनः ।
बाला स्त मस्तुवन् कृष्णं वेदांतै र्यस्तु लक्ष्यते ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

श्रीगोपालक मेक मेव परमं दैवं सदा मानये
श्रीवत्सांकितवक्षसं श्रितजनाधारं समाराधये ।
आम्नायांत सरोजहंस मखिलानन्दात्मकं शाश्वतं
कुक्षिस्थाखिललोकरक्षक ममुं गीर्वाणगेयं प्रभुम् ॥

= कांभोजीरागेण आदितालेन गीयते =

श्रीगोपालक मेव दैवतं हृदये ॥प॥
आगमारविंद बृंदहंस माकलये ॥अ॥

सर्वलोकैकशरण्य चरणारविंदं
दुर्विनीतमदभंग दोर्दंडबृन्दम्
निर्विशेष निरंतर निर्मलानन्दं
गीर्वाणगन्धर्वकोटि गीतगोविंदम् ॥

निजजनस्वर्गापवर्ग नित्यदातारं
अज मव्यय मादिदेव मनुपमाचारम्
विजयसारथि मशेषविदुषा माधारं
भुजबलनिर्जित वैरिभूपालशूरम् ॥

लक्षित सर्वभुवनलक्षण मेकं
पक्षिराजवाहनं विपक्षशिक्षकं
कुक्षिगत जगदंडकोटिधारकं
अक्षीणगोकुलनिवास लक्ष्मीनायकम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

नारदादिमुनि गेयनामधेयकं
नामरूपनिर्वाहक माम्नायमानकम्
वारिजासनादि विनुत वारतशोकं
नारायणानन्द तीर्थानन्ददायकम् ॥

इत्थं गोपालकै र्गीतो भगवान् भक्तकामदः ।
गोभि र्गोपालकैः कृष्णो गोकुलं पुन रागतः ॥

इति श्री नारायणतीर्थ विरचितायां- श्रीकृष्णलीलातरङ्गिण्यां
श्रीकृष्ण गोपालकवर्णंन नाम- चतुर्थतरङ्गः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

पञ्चम स्तरङ्गः

कथासंग्रहः

गोपीवस्त्रापहाराख्यं चरित्र मभिनीयते ।
गोवर्धनाद्रे रुद्धार श्चरितं हरिणा कृतम् ॥
पात्रप्रवेश स्तु पुन र्नंदो गोप्य स्ततः परम् ।
बालकृष्णौ ततः कृष्णकृतं वस्त्रापहारणम् ॥
उद्धृत्य रक्षिते चास्मिन् गोकुले ऽद्रिं कृता स्तुतिः ।
इन्द्रेण कामधेन्वा च कृष्ण स्यात्रैव संग्रहः ॥

गोपीवस्त्रापहरणम्

नितंबिनीगणं ह्रदे दिगम्बरं विलोक्य तत्
वरांबरं बहिः स्थितं करांबुजे समुद्वहन् ।
बृहद्वने तटद्रुमे महोन्नतो हरिः स्थितो
वदन् विचित्रनर्मतं हस न्नगाय ते दृशम् ॥
बध्वा दुकूलं शाखाग्रे कुतूहलतया हरिः ।
वल्लवीवल्लभ कृष्णो हस न्निद मुवाच ताः ॥

== केदारगौलरागेण त्रिपुटतालेन गीयते ==

आयाहि व्रजयुवतिबृंद त्वरया
मायाहि सलिले दूरम् ॥प॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

आयासो मा भवतु अल मधुना तव
तोयक्रीडया परया ॥अ॥
परिणाम विरसफलोदय कर्मणि - पाटव मतिवितथं
परिणामविरहित परमपुरुष मेव - भज जगदेकनाथम् ॥
परिगृह्णाण भुवनबाह्य द्दगावरणं - परिहरसि वृथा कथम्
परमबांधव स्तव प्रकट मेव वदति - परिहर खेलनबन्धम् ॥
आनन्दमयभवने तव जननी - सानन्द मनुसरति
मायातीतवपुषं माधव मेव जनकं - मानय मानय सति ॥
हरिविरचित परिहासकथा रस गौरवसंस्मरणं
गुरुभक्त शिवनारायणतीर्थ कृत मिंद - गोविंदजनभूषणम् ॥

गोविंदं गोपिकानन्दं वदन्तं नर्मशर्मदम् ।
पुन्नागविटपाग्रस्थं पुण्यपुंजफलोदयम् ॥
भक्तानुग्रहं सुव्यग्र गृहीताद्भुत विग्रहम् ।
इत्थं गोप्यो जगुः कृष्णं कंठघ्नजले स्थिताः ॥

≡पुन्नागवरालीरागेण आदितालेन गीयते≡

श्रीकृष्ण तावकमहिमा केन वर्ण्यते ॥प॥
लोकालोकनावरण लोकेश देहि नौमि ते ॥अ॥
पुन्नागराजाधिरूढ पुरुषोत्तम
उन्नतवंशविस्तार छिन्नपापाखंडितश्रीः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

शाखाग्रलक्ष्य सद्विग्रह शं विधेहि भो
शोकसागरा दुद्धर मां शुद्धभावं संदर्शय भो ॥
नन्दयशोदानन्दन नलिननाभ
सुन्दरहासविलास सूचितै रलं विमलाभ ॥
सर्वकामादि गुणाकर सर्वपालक
शर्वरी नायकानन शातकुंभवर्ण वसन ॥
गोविंद किं करवाम गोपबालक
नव्यगोपीगीत मिदं नारायणतीर्थ रचितम् ॥

श्रीकृष्ण गोपी संवादः

गोपीभिः प्रार्थितः कृष्णो गोविंदो भू र्यनुग्रहम् ।
कुर्वाण स्तासु संवादं भूयो ऽप्यकृत सादरम् ॥

= धन्यासीरागेण अटतालेन गीयते =

कृष्णः आवरणं मम नहिं ते दातुं
भावय गोपवधूजनबृन्द ॥
गोप्यः देव यदावरणं मम नीतं
देहि विभो भवता त दनन्त ॥
कृष्णः नीतं नैव मया परकीयं
नैव ममावरणं निजदृष्ट्या ॥
गोप्यः हा गृहाण भवा निति पूर्वं
देहि तदावरणं मम बन्धो ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

कृष्ण: अक्षिनिमीलन मेव मयोक्तं
साक्षा दिह तु गृहा णावरणम् ॥

गोप्य: लोकालोकन विहितावरणं
लोकेश्वर मम देहि समुदितम् ॥

कृष्ण: लोक स्यावरणं न विधातुं
लोके कोऽपि समर्थः पुरुषः ॥

गोप्य: कश्च न नालोकयति यथा ऽस्मान्
कलय तथाविध मेवावरणम् ॥

कृष्ण: लोक्यो नालोकयति हि लोके
लोकं कश्च न क मपि विरोधात् ॥

गोप्य: लोक्या एव वयं परभोग्याः
लोके शावरणं तु विधेहि ॥

कृष्ण: तर्हि तदावरणै रल मल्पैः
तस्य न किंचि दलोक्य मि हास्ति ॥

गोप्य: कि मिद मलौकिक सिद्धावरणं
के वा वय मिह लज्जाभरणाः ॥

कृष्ण: युक्ति सहं न हि भवदावरणं
योगिभि रिति मीमांसित मबलाः ॥

गोप्य: अस्माभि र्न विधेयं कि मपि
ह्यवगत मच्युत त द्वद भगवान्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

शिवनारायणतीर्थ सुगीतं
श्रीहरि गोपीजन संवादम् ॥

आबाल्य मेत द्युष्माक मबलाः केवलं मतम् ।
उभाभ्या मेव हस्ताभ्यां गृह्णन्तु वसनानि वः ॥
इ त्युक्त्वा वसना न्यासां दत्वा गोपालकै स्सह ।
अवरुह्य तरोः कृष्णः प्रययौ स्वगृहं मुदा ॥

गोवर्धनोद्धरणम्

इन्द्रभागसमारंभं नन्दादीनां विलोक्य सः ।
ऐश्वर्यं ख्यापयन् स्वीयं नन्द मा हेद मच्युतः ॥

=कांभोजीरागेण अटतालेन गीयते=

इन्द्रयागसमारंभसंभ्राम - मिह तु मुधा मन्ये ॥प॥
चन्द्र रवि पावक मुख सुर वर -
परिगणितविभूति रयं हि तात ॥अ॥
सकललोकजनकं सकलागम - संबोधितमहिमान मानिंद्र
प्रकटितजगदण्ड कोटिवदन मिह - साक्षा देव विहाय महेंद्रम् ॥
वनचरा हि वयं वनपर्वत - वर्धितभुवि वन मेत दधुना
अनुपमान्नरसादिभि रचलेन्द्र - मनुपम माराधयामो विधिना ॥
गिरिवनसरि दमर नर खगादिषु - परिपूर्णबोधस्स मागमविदित
हरि मिह गोवर्धन गिरिवरयुत - मच्युत मेव भजामो निरतम् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

नन्दनन्दनगीत मिदं भुवि · नन्दगोपहितं मुहु रधुना
नन्दयोगिविचिंतित मनुशिव - नारायणतीर्थकृत मिति विधिना ॥

गोवर्धनगिरेः पूजां गोविंद वचनादरात् ।
चक्रु र्नंदादय स्तूर्णं सवनस्य गवां तथा ॥

अथ देवेन्द्रागमनम्

= नादनामक्रियारागेण आदितालेन गीयते =

सहस्रामरसेवित स्सहस्राक्षः श्शतक्रतुः ।
सहस्रगोत्रभि द्वज्री शचीनाथो विराजते ॥
क्रुद्धस्य तस्मा दिंद्रस्य ववृषु स्सततं घनाः ।
गोकुलं व्याकुलं तस्माद्विलोक्य धृतवाग्भिरिम् ।
छत्रीकृतगिरिराजे रक्षितगोपाल गोधनसमाजे ।
गोविंदे त मनन्तं भक्त्या गोप्यो जगुः परं तुष्टाः ॥

= मुखारीरागेण अटतालेन गीयते =

गोवर्धनगिरिधर गोविंद
गोकुलपालक परमानन्द ॥प॥
श्रीवत्सांकित श्रीकौस्तुभधर
भावक भयहर पाहि मुकुन्द ॥अ॥
पुरुहित मखवि घातसुचतुर
पुरुषोत्तम पूरित जगदुदर

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

मेरुभूरिधै यधिविदूर
मीनकेतुशत कोटिशरीर ॥
अमितकल्याणगुण अगणितलील
अपरिमितानन्द धन नंदबाल
शमितदैत्यदंभ शांत्यादिमूल
विमलमानसवृत्ति विलसितशाल ॥
वहतोजगदंड कोटी स्त वेदं
वरद कि मद्भुत मचलेन्द्रवहनं
महनीयकीर्ति मावहसि देहि मुदं
माधवनं मद मपनयसि घनम् ।
आनंदामृत वारिधिखेल
अलघुपराक्रम अनुपमलील
श्रीनंदात्मज श्रितजनपाल
श्रीकरकिसलय लालनलोल ॥
पाटितसुररिपु पादपबृंद
पावनचरित परामृतकंद
नाट्यरसोत्कट नानाभरणं
नारायण ती र्थार्चितचरण ॥

— —

रक्षिते गोकुलजने हरिणा गिरिधारिणा ।
लज्जाभगनतशिरा स्सुररा जोऽभव त्तदा ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

निवृत्ते मेघसंघाते स्वस्थे गोकुलवासिनि ।
स्थापिते च गिरौ कृष्ण मिंद्रः स्तौ तीति सादरम् ॥

श्रीगोपाल कृपानिधे करुणया स्वामिन् मयानुष्ठितं
क्षन्तव्यं भव तापराधशतकं यद्यत् क्षणे त त्तदा ।
आदित्यादि समस्तदेवनिवहो य स्याज्ञया वर्तते
स त्वं सात्वतपुंगवः श्रुतिशिरोवा ग्गोपिकावल्लभः ॥

= तोडी (शंकराभरण) रागेण अटतालेन गीयते =

मामकापराधशतं क्षम्यतां त्वया ॥प॥

मामकापराधशतं मा गण याथ वायुतं
श्यामवर्ण शमान्वित शाश्वतानंदसंदोह ॥अ॥

अंत्यन्तकृपासागर आदिपुरु षानाधार
नित्यद जगदाधार निर्हृतासुर
श्रुत्यन्तवनसंचार शोभनफलदाचार
भृत्यदयाधृताकार भ्रमकारणविदार ॥

कामशतकोटिवेष खंडितनिखिलदोष
दामोद रोदारभाष दासपोष
कमलाकृताभिलाष कमनाकलिताशेष
सामगीताश्रिताशेष साधुजनसंतोष ॥

आदित्य चन्द्रमंडला भ्यन्तराधार निर्मल
बोधरूपानंदाचल पोषिताखिल

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

वेदपुराणादिमूल वेणुगानक्रीडालोल
सुन्दरतरगोकुल श्रीधरनाथ गोपाल ॥
धाराधराकारधीर घोरारिसंहारशूर
नीरजनाभनिरुपम ॥ निर्मलानन्द
पारावारश्रीविहार पापतिमिरभास्कर
नारायणतीर्थसंतार ॥ नानागमांतसंचार ॥

इन्द्रसहायार्थ मागता कामधेनुः स्वकीय क्षीराभिषेकपूर्वक श्रीकृष्ण मिद माह ॥

नन्दकुमारक मनघं नौमि परानन्दघन मखिलवन्द्यम् ।
सुन्दरसरसिजनेत्रं मन्दस्मितसांद्रचंद्रिका चन्द्रम् ॥

=सावेरीरागेण त्रिपुटतालेन गीयते=

नन्दनन्दन गोविंद नौमि ते पदम् ॥प॥
मन्दरभूधरोद्धार मधुरगोपालकृष्ण ॥अ॥
सरससुन्दरहास समुदितनिजभास
निरसितांधतमस नित्यानन्दरस ॥
अपरिमितकरुण असुरवृन्दनिर्हरण
तपनीयांबरभरण दासपोषण ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

कलितकस्तूरितिलक कमनीयफालफलक
ललितत्रिवलिपुलक लक्ष्मीपालक
कौस्तुभशोभितकंठ कलितश्रीवैकुंठ
विस्तीर्णदयोत्कंठ विनतश्रीकंठ ॥
हरिहयमणिनील हाटकमणिकुण्डल
नरनारायणलील नंदिताखिल ॥
गोप रमणीनयन कुमुदचन्द्रवदन
तापस मानसायन तापनाशन ॥
शरणागतहितार्थ शंसित नतपार्थ
वरनारायणतीर्थ वर्यपुरुषार्थ ॥

——

स्तुत्वा सुरेंद्र श्श्रीकृष्णं विज्ञाप्य ज्ञातकौशलम् ।
अज्ञातो लोकगुरुणा धेन्वा सह दिवं गत ॥

इति श्रीनारायणतीर्थ विरचितायां श्रीकृष्णलीलातरङ्गिण्यां गोपीवस्त्रापहार गोवर्धनोद्धारवर्णनं नाम पञ्चमतरङ्गः ॥

——

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

षष्ठ स्तरङ्गः

कथा संग्रहः

वृन्दावने ऽथ श्रीकृष्णगोपीसंगो ऽभिनीयते ।
आदौ गोप्य स्ततः कृष्णो गोपीनां कृष्णसंगमः ॥
गोपीश्रीकृष्णसंवाद स्ततो गोपीपरिग्रहः ।
षष्ठे स्मिन् संग्रहे णैव रासारंभो निगद्यते ॥

= श्रीकृष्णगोपीसमागमवर्णनम् =

शार देव शर दागता स्वयं तारकोदय विशेषभासुरा ।
वारितेषु सलिलेषु धीमतां स्मारितार्थ मवभासयं त्यसौ ॥

तत्र भगवति श्रीनिवासे परिपालितनिजदासे संततानन्तकल्याणगुणगण नवरत्नरत्नाकरे सरलमुरलीनाद समुदंचितविविधगीत समुद्घोषमन्द-गमनोल्लास विविधविलास बहुतरकल्लोलजाले भुवनसुन्दरे श्रीकृष्णे विहरति तस्मिन् व्रजयुवती मनोनद्यः स्यन्दमानाः समभिव्यक्तशारद विमलीकृत वृत्तिविशेषानुभवरसाढ्याः तदैकरस्य मभिलषंत्य स्सत्वर माविविशुः इत्थं चतासां वचोविलासाः प्रादुर्बभूवुः ॥

= केदारगौल (तोडी) रागेण आदितालेन गीयते =

परमपुरुष मनुयाम वयं सखि— परमपुरुष मनुयाम ॥प॥
सुरुचिरहासं सुन्दरनासं तरुणारुणकिरणाधर सरसं ॥अ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

नन्दकुमारं नगवरधीरं बृंदावनभुवि विविधविहारं
बृंदारकगण वंदितचरणा रविंद मिलित मणि मधुकरनिकरं ॥
भावुकचरणं भवसंतरणं भव्यसेवकजन भाग्यवितरणं
अव्ययविमल विभूतिविजृंभित दिव्यमणिरचित विविधाभरणं ॥
परमोदारं पापविदूरं स्मरसायकस्रग्धर मतिचतुरं
विरचित मुरलीगीत रसामृत भरितघनंघन कौस्तुभहारं ॥
युवतीगीतंनियोगिसुललितं कविजनमानस कमलविलसितं
शिवनारायणतीर्थ विरचितं श्रीगोपालदयारस मिलितम् ॥

भो भो व्रजपुरनार्यः शारदसमयं परं शिवं मत्वा ।
कृपया तस्य भजामो गोविंद प्राहु रिति सदाऽन्योन्यम् ॥

शरदृतु वर्णनम्

=कल्याणी (सारंग) रागेण त्रिपुटतालेन गीयते=

शंके शंकरं शारदसमयं
पंकेरुह परागविभूतिधवलं ॥प॥

पापपंकशोषण पटुतर रविकिरणं
परिहृतापरिमित घनावरणं
कपटकेतकीकुसुम भारविरहिणं
कलिततारकगण स्फटिकाक्षाभरणम् ॥
परपुरुष सुरति पति कामविदूरं
पंडितमंडल परमाह्लादकरं

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

वरहंसगतिविघ्न पाटनचतुरं
वांछितसमुदित फलविधातारम् ॥

निर्मलरसपूर निरुपमशृंग
निखिल मानिनीजन मानविभंग
शर्मदशशिधर सरसोत्तमांग
समुदितगोविंद कृतबहुसंग ॥

इति गोपवधूगीत मिद मतिललितं
ईशोपम शारदसमय विलसितं
यतिवर शिवनारायणतीर्थ फणितं
यादवाब्धिज रत्नसम्मिलितम् ॥

इति प्रलपति व्रजे शरदि गोपिकामंडले
सुधाकिरणमंडले परिहृतांधकारे निशि ।
पराक्प्रवणमानसा स्स खलु कृष्णसाराः स्फुटं
मुरारिमुरलीरव स्सपदि ता स्सामाकर्षति ॥

कापि गोपी परं कांतं कामचारफलोदयम् ।
गन्तुका मेतरां गोपीं त्वरयं तीद माह ताम् ॥

=मुखरी (पुन्नागवराली) रागेण त्रिपुटतालेन गीयते=

बृंदावन मधुना मन्ये सखि
बृहदारण्य महं ॥प॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

सुन्दरतरवंशनाद संसूचितस्वा-
नन्द बोधामृतमय पुरुषं ॥अ॥

उन्नतशाखाग्रपरानन्द
निर्णयरसपूरफलभारं
पुण्यवता मतिरमणीय ममरेंद्र
वर्णितभूमपदं भवपारम् ॥

मुनिवरपरिसेवितं मोहविराम
मूल मशेषविशेषास्पदं
अनिकेतनिकेतन मखिलशोकहर
मनुदयलय परतर सिद्धफलदम् ॥

सकृ दिद मवलोकितं सम्य गिह
स्वसुत कलत्रादि धनविरसं
प्रकटयति परमहंससमाकुल
ममलमानसवृत्ति विललितसरसम् ॥

परिहृतरिपुवर्गं परमयोगि
परिपूर्णभाव विशेषांदयं
हरिपरभावनया गोपिकागीत
मिति फणितं नारायणतीर्थ यतिना ॥

— —

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

इत्थ मन्योन्यस्नेहदयारसस्यन्दन द्रवीकृतचित्तवृत्तिविलासोल्लासित वाग्विलासवत्योर्गोकुलपुरवरयुवत्योर्गोविंद बृंदावनसमुदंचित विपुलतर लक्ष्मीविलास लास्यरंगस्थलायमान रम्यवक्षोविशालफालादि सुन्दरसर्वांगं स्वकांत मालक्ष्य मदनमहीपतिकार्मुक महामेघसमुद्गलित शतवर्षधारा इव निबिडतरवृन्दारण्यनिगूढं नवनीतमुषं समासाद्य-सकललोकाभीष्टफलं फलयन्तं विश्वम्भराप्रदेश मिव वर्षधारा स्श्रुतय इव श्रोत्रिय समधिगता स्सत्वर माजग्मुः नयनोत्पलानि च तस्मिन् श्रीनिवासे प्रसारयामासुः ॥

ज्ञात्वा हरिः स्थिरं भावं परस्मिन् पुंसि योषिताम् ।
आविष्करिष्यन् गोविंद स्तासां प्राहेद मादरात् ॥

≡शंकराभरणरागेण आटतालेन गीयते≡

पल्लवांगना माकलयत धर्मोल्लंघनम् ॥प॥

पल्लवांगना निजवल्लभ पदयुग
पल्लवसेवन मेव परो धर्मः ॥अ॥

कुलशीलकर्मादि कुलीरादिजालं
कोपसंतापादि निबिडकल्लोलम्
अल मिह संसारजलधि मागमकृत
कुलधर्मसेतु रथ तारयति बहुलम् ॥

रहसि निशि वने किं रमणीयचरणं
महनीयगृहपति मपहाय तरुणम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

सहसा परमपुरु षानुसरणे नाल मिह
गृहपति मिह यात गृहिणीशरणम् ॥
गुरुबन्धुजनावज्ञा कुत्सिताचारं
परिहरत कुरुत परिपरिहारम्
त्वरयैव गृह मनुयात पातकबुद्धि
मरिवर्ग मपि परिहरत निस्सारम् ॥
परिपूर्णबोधैकरस मखिलसारं
परमपुरुष मनुसरत बालगोपालम्
गुरुवर करुणासुधा समुदंचित
शिवनारायणतीर्थ यतिगीति मतुलम् ॥

श्रवणांजलिभि र्गोप्यो गोविंदवचनामृतम् ।
पीत्वा ऽपि जातिस्वाभाव्या लज्जाभारभरैः स्थिताः ॥
पुनः पुन र्बोधयन्तं धर्मसारगिरा हरिम् ।
ऊचु र्गोप्यो हरे स्तत्त्वं व्यंजयन्त्यो यथागमाः ॥

गोप्यः कृष्णं स्तुवंति
= मंगलकापीरागेण अटतालेन गीयते =

शरणं भव कृष्ण संसरतां भव कृष्ण ॥प॥
करुणा तव संसरणपयोधि सं–
[illegible] स्माकम ॥अ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

आरंभण मथ जगति फलावधि
धीरमुनिभि रिह निश्चित मखिलम्
भूरिकृपालय माहु रि हागम–
सारं त्वा मखिलात्मक ममलम् ॥

नूनं त्रिभुवन गृहिणीपति रिति
गानं महता मनुसंविदितम्
श्रीनन्दात्मज श्रीवसुधाधिपा–
नन्दं त्वा मनुयामो निरतम् ॥

कामिनीजन सकलकामदुहं परम-
कारुणिकं प्राहु रेव भवन्तम्
कोमलगिरा गोपिकागणगीतं
गोविन्द मिति नारायणतीर्थ फणितम् ॥

जन्मान्तर सहस्रेषु कृतपुण्य फलोदय ।
इद माह परां कान्तं कुर्वन्ती प्रणती मुहुः ॥

≡ बिलहरी (मोहन) रागेण आदि तालेन गीयते ≡

पूरय मम कामं गोपाल – पूरय मम कामम् ॥प॥
वारं वारं वन्दन मस्तु ते – वारिजदलनयन गोपाल ॥अ॥
मन्ये त्वा मिह माधवदेवं–
मायास्वीकृत मानुषभावम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

धन्यैराद्दत तत्त्वस्वभावं–
धातारं जगतां मतिविभवम् ॥

बृंदावनचर बर्हावतंस- बद्धकुंजवन बहुलविलास
सांद्रानन्द समुद्गीर्णहास- संगतकेयूर समुदितदास ॥

मत्स्यकूर्मादि दशमहितावतार–
मदनुग्रहा दव मदनगोपाल
वात्सल्यपालित वरयोगिबृन्द-
वरनारायणतीर्थ वर्धितमोद ॥

———

नृणां बन्धहृतिं कुर्वन् नृसिंहो ऽसि दयाघन ।
इति संबोध्य गोविंदं सानन्द प्राह गोपिका ॥

=सावेरिरागेण त्रिपुट तालेन गीयते=

करुणाय ऽवलोकय मां	श्रीनृसिंह ॥प॥
शूरासुरसंहार	शोभनाद्रि श्रीनृसिंह ॥अ॥
परिपूर्णदयारस	पाथोधिबृंहण
प्रह्लादचन्द्रोदय	श्री नृसिंह
निरसिततामस	निर्विशेषमानस
गुरुतरवीर श्री	गूढसुगुणालय ॥
पातकमहाटवी	पङ्क्तिगोपानल
भक्तचन्दनशीतल	श्रीनृसिंह

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

उत्तुङ्गसुकिरीट उन्नतकेयूर
मत्तचित्तमातंग मर्दनमहाबल
त्रैगुण्यफलातीत तत्त्वफलात्मक
तापजलधितारक श्रीनृसिंह
श्रीगुरुकरुणया श्रितभक्तिसुधारस
श्री नारायणतीर्थ श्रेयोविधायक ॥

अन्या ऽपि युवती काचि दन्या दृशगिरा हरिम् ।
धन्या संबोधयं त्यद्धा सन्यायं प्रह सादरम् ॥

≡ पुन्नागवरालीरागेण अटतालेन गीयते ≡

भूयो भूयो याचें ऽञ्जलिना
भूमन् त्वयि मे दास्यं देहि ॥प॥
निमिषार्ध मपि तव दर्शनविधुरा
निंद्या हि तनु रेषा
तामरसेक्षण तव पादकमले
तनुतां तनुतां मम तनो रतुलाम् ॥
कांतं कांतार मपि तव योगे
कमलेक्षण मन्ये
कांतारं गृह मपि तु वियोगे
करुणा तरुणी मयि तव भवतु ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

वरयामि गोपालवल्लभ मधुना
त्वरया ऽह मखिलगुरुं
सरसगिरा गोपयुवतीकथित मिति
गुरुकृपया नारायणतीर्थ फणितम् ॥

मुरारिवचनाव्यग्रा वल्लवी कापि तत्परा ।
संबोधयित्वा स्वसखी मिति गायति सादरम् ॥

≡कल्याणीरागेण अटतालेन गीयते≡

वद किं करवाणि सखि हे
वद कोकिलशुकवाणि । प॥

बत वनभुवि बर्हिबर्हावतंसो
वदति कि मपि कि मपि वक्रतया ऽलम् ॥अ॥

निमिषार्ध मपि युगसहस्रसमतया
नीतं मया दिन मासायम्
अमितकृपानिधि रय मिति सहसा
अधुना ऽऽगत मिह त्यजति कथ मयम् ॥

गृहपति पुत्र धनादिषु ममता–
ग्रह परिग्रहीतांतरंगम्
महनीयमुरली सरलगीत मन्त्रेण
सोचित मपि रचयति गृहसंगम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

तपसा किल महता भुविकल्पक–
तरु मुपलभ्य को ऽपि कामितदम्
सफलेय मिति गोपिकागण गीतं
विपुलं शिवनारायण तीर्थे नेदम् ।

श्रीकृष्णः गोपीः परिग्रहति

मध्ये कृष्णं मरकतमणिच्छाय मिच्छाविहारं
कृत्वा गोप्यः कुवलयदृशो नायकं वेष्टयंत्यः ।
गायं त्य स्तं सरसवचसा दास्यभावं भजतो
बृन्दारण्ये मणय इव ताः पद्मरागा इ वासन् ॥

निगमबृन्दसरोरुहसंगतं निखिललोकमधु स्वसुखात्मकं
मधुरिपुं प्रतिलभ्य च वल्लवी मधुकरा स्सुकरं जगु रि त्यलम् ॥

≡ केदारगौल (काम्भोजी) रागेण अटतालेन गीयते ≡

वनभुवि गोपाल मिह विहरन्तम् ॥प॥

वल्लययुवतिजन वलयभास्वन्तम् ॥अ॥

निगमसरोरुह नित्यसंगतमधु
मधुहरात्म तये ह समुदितम्
अगणितगोधन मपरिमितानन्द
मानन्दकर ममरेशितु रपि तम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

इनशशिपावक तारक भासक
मीक्षणसमुदित जगदेकनाथम्
मुनिजनमानस स रसवरहंस-
महनीयदैवत मखिलदेहरथम् ॥

लावण्यसरिदेकनायक मखिलसं-
रक्षण ममरसंरक्षण मधुना
सेवक शिवनारायणतीर्थ भावित
श्रेयोविधायक मिह वेदविधिना ॥

गयंत्यो ननृतु श्चेत्थं गायन्तं नन्दनन्दनम् ।
वेणुनाद सुधाधारा मुद्गिरंतं मुहु र्मुहुः ॥

इति नारायणतीर्थ विरचितायां-श्रीकृष्णलीलातरंगिण्यां श्रीकृष्णगोपी समागमवर्णंन नाम षष्ठतरङ्गः ॥

— —

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सप्तमस्तरङ्गः

कथासंग्रहः

अ थाभिनीयते रासक्रीडाख्यं चरितं हरेः ।
गोपीकदंबसहित श्रीकृष्णागमनं वने ॥

तासां तत्त्वोपदेशश्च ताभि रानन्दतांडवम् ।
तत्कृतं हरिणा सर्वं पुष्पवृष्टि स्सुरैः कृता ॥

लास्यतांडवसंगीतैः गोपीनां चित्तरंजनम् ।
संग्रहः कथित स्त्वेवं सप्तमे ऽस्मिन् तरंगके ॥

श्रीकृष्णः गोपीभ्यः तत्त्वोपदेशं करोति

अनेकजन्मसाहस्र तपसा परितोषितः ।
आविर्भूत स्स भगवान् तासु गोपीषु जन्मनि ॥

तत्र खलु बृन्दावने मन्दारपारिजात संतानकल्पकहरिचन्दनादि तरु-बृंदानंदित शुकपिकशारीकादि बृन्दविनिंदितनन्दनोद्याने समुत्फुल्ल-शारदमल्लिकादि मकरंदपरिमललालसतया संचरच्चचरीकझणझणात्कार नूपुररवैः विचित्रपतत्रिवक्त्रोद्गलित नानाविधविनोदनिनाद ताल-मृदंगसंगीतादिकलाविशेषैः आलक्षितानेककोटिवनदेवतानाट्यरसो-त्कटी कलिंदनंदिनं पुलिंदसमुल्लसित लतङ्गलतादिविविधलताभवने क्वापि क्वापि शारदसांद्रचंद्रिकासंगविलसित मणिवालुकमौक्तिकसित-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

सिकता सुधारमणीय वेदिकाजाले दिव्यविमानसमारूढसुरकिन्नरादि वरवनितागणेषु पश्यत्सु वर्षत्सु च महु र्मुहुः पारिजातादिदिव्यसुगंधि- कुसुमानि भक्तसंकल्पसिद्धिमातन्वानो गोपरमणीय नयनोत्पलाराधित मदनगोपालमूर्ति र्वासुदेवो गोपीभि स्सह रासक्रीड़ामहोत्सवारंभ संभ्रमचेताः गोपिभिः सार्थं मात्मतत्त्वमुपदिश न्निद माह ॥

ब्रह्मानुसूतिरसिकां शौरे र्वाग्लक्षणां सुधाम् ।
गोप्यः पिबंत्यो मोदन्ते कृष्णब्रह्माणि ताः स्थिताः ॥

नृत्यंत्य स्तेन तद्गीतं गायंत्यो रासमंडले ।
तेनोपदिष्ट मद्वैत मनुकुर्वंति मानतः ॥

=मुखारिरागेण आदितालेन गीयते=

अद्वय मखंडित मशेष जगदादिं
यत्र च जगत्त्रितय मास्थित मनन्ते
यत्र विलयं पुन रुपैति मृदि कुंभो
यद्व दवधारयत सत्य मिति मा मोम् ॥

य श्च निजशक्तियुत मैक्षत पुरस्तात्
य स्पुन रभू द्विकृत मैक्षत सुतेजः
य श्च क मभू त्पुन रुदैक्षत य दन्न
जात मवधारयत सत्य मिति मा मोम् ॥

य स्पुन रभू त्त्रिविधपूरुषशरीरं
य त्त दनुविश्व सकलं त्रिवृत मासीत्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

जीवकलया सकलसाक्ष्यविकृतं सत्
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

अन्नसलिले अभवता मसितपीते
प्राणमानसपरिणदे परमसूक्ष्मे
वा गभव दप्यसित मल्पपरिणामि
ज्योति रवधारयत सत्य मिति मा मोम् ॥

षोडशकलः पुरुष एष परिशिष्टः
तासु विलयं परिगतासु न च वेद
तासु तु समस्त मनुपश्यति त दित्थं
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

येन पुरुष स्समरसत्व मुपलभ्य
स्वापसमये स्वपिति नामक इति स्यात्
यत्र विलयं समनुयाति मन आदि
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

यत्र मधुपाहृत मधूप मित मेतत्
चित्रस मेकरसतां समधिगम्य
नैव रसभेद मिह वेद जगदादि
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

यत्र जलधौ समरसत्व मनुयाताः
त त्पृथ गशेषसरितो न विन्द रेवम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

ब्रह्मणि जना अनुदिनं समनुयाताः
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

यस्य कलयाय मखिलस्य सा हि भोक्ता
तत्परिहृतो मृत इति प्रतिवदंति
यच्च भवमृत्युरहितः सकलसाक्षी
त त्वमवधारयत सत्यमिति मा मोम् ॥

यत्र च विजृंभित मिंद स्वगतशक्त्या
स्या त्पृथ गवस्थित मशेषजडजातम्
यच्च वटबीजसदृशं परमसूक्ष्मम्
त त्वमवधारयत सत्यमिति मा मोम् ॥

सिंधुजनितं सलिल मिश्रित मि वात्मा
सर्वगत एकरसता मनुगतो यः
वेदशिरसां परिचयेन सुविविक्तः
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

बद्धनयनो वनभुवि प्रतिविमुक्तः
प्रश्न मुपलभ्य नगरं पुन रवाप
यद्गुरुमतं पुन रवाप निजबुद्ध्या
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

यत्र लय मेति मन आदि परमात्म
न्यन्य दनुपश्यति न बन्धुजन एषः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सर्वविलये ऽप्यविलयं यदवशिष्टं
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

अक्रियतया सकलविक्रियदृशित्वा
न्नैव हननादिविषया यदवशिष्टम्
तप्तपरशुस्पृ गिव सत्यपरिगुप्तं
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

किन्नु कथनीय मबला यदनुभूतं
सर्व मनुभूति मपहाय न तु तत्त्वम्
नित्य मनुभूति सुखविग्रह मचिन्त्यं
तत्त्व मवधारयत सत्य मिति मा मोम् ॥

सत्य दिति सर्वविषये प्यनुगतं यद्
भासकतया प्रियतया च परिशिष्टम्
मान मिति मेय मिति हीन मतिरिक्तं
विद्वदनुभूत मवधारयत सत्यम् ॥

निश्चित मशेष निगमांतवचनै र्यत्
तत्त्वमय मित्यखिलसार मनुभूतेः
तर्कशतकै रपि दृगेकरस माद्यं
धीर मतिगम्य मवधारयत सत्यम् ॥

पर्यवसितं निगमवाक्शतक मिश्रे
लक्षकत यास्य विषये परिसमाप्तेः

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

सर्वविषयस्य च तदात्मकतया तं
शिष्ट मवधारयत सत्य मिति मा मोम् ॥

श्रीमुररिपो र्वदनपद्म मकरंदं
ब्रह्मसुखसारवचनं बहु पिबन्तः
गोकुलवधूमधुकरा स्सुपरितृप्ताः
रासभुवि मंडलकृतो बहु रमन्ते ॥

सामनिगमांत वचनार्थ मुपलभ्य
स्वानुभव मेक मखिलैकरसमूतम्
एतदमृतं भवभयापहर माद्यं
नारायणानन्द तीर्थ परिगीतम् ॥

रासक्रीडा वर्णनम्

संसाररोगसंतप्ताः कृष्णब्रह्मरसायनम् ।
गोप्यः पिबंत्य स्तन्मुक्ता रमन्ते ह्यभयं गताः ॥

अत्मारामाः परानंदनित्यतृप्ताः पुनः पुनः
अत्मानुभूतिं गायन्त्यः कृष्णैकरसतां गताः ॥

रमन्ते परमानन्दे कृष्णब्रह्मणि ता भृशम् ।
त्यक्तदेहाद्यहंमाना निर्विशेषसुखे स्थिताः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

≡भैरवी (घण्टा) रागेण अटतालेन गीयते≡

मर मिह पश्यत पूरुषं स्वीकृतमायिक मानुषम् ।
निजपरभेदरहितदृश मक्षर मीक्षणकृतभुवनं विभुम्
उपनिषदेक समधिगत मद्वय बोधसुखैकरसं प्रभुम् ॥
इद मिद मि त्यखिलेषु स्वमनुगत सत्यचिदद्वयविग्रहम्
श्रुतिशिरसि प्रविविक्त मसक्त मभक्तजनै रतिदुर्ग्रहम् ॥
गगनमरुन्मुख भूतसमुदित समस्तजग त्प्रतिभासकम्
तदनु तदन्तरसमय मशेष विशेष मखंडसुखात्मकम् ॥
अधिगत मन्नमयादिषु योगिभि रांतर मांतर मव्ययम्
हरि मखिलैकरसं जननादि विकारविहीन मनामयम् ॥
विदु रिह यं निगमांतवचोभि रपोह्य परां च मखंडितम्
अघटित संघटना घटिताकृति मद्भुत कुंडलमंडितम् ॥
स्वजनदयाधृत देह मदेहतया- विहरंत मिह भूतले
वनभुवि रासमय रसपंडितं गोपवधूकृतमंडले ॥
अतनु मशेषतनुं जगता मभयं भयकारण तारणम्
निजकलया परिबृंहित सर्वजनात्मतया ऽघनिवारणम् ॥
सकृदवलोक निराकृतगोप वधूजनताप मरिंदमम्
नवजलदाभतनुं तटिदभ पटं नटवेषधरं समम् ॥
हरिचरणस्मर णैकपरायण जनसुखदं परदैवतम्
मुनिनारायण तीर्थसुविरचितगीत मिदं निगमान्वितम् ॥

— —

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

जगदुदयलयादे स्मादरं साधकै र्यत्
श्रुति गुरु दृढभक्त्या लब्ध मद्वैततत्त्वम्
श्रुतिशिरसि विविक्त पंचकोशान्तरस्थं
नरभुवि विहरन्तं तं तु पश्यंति गोप्यः ॥

एवं कृष्णात्मतत्त्वज्ञाः कृष्णब्रह्म त्मना स्थिताः ।
सर्वोपनिषदां सारं गायंत्यः कृष्ण मासते ॥

हृदयनिहितं कांतं काचि त्कलिंदसुता तटे
प्रियतम मथालिंग त्यद्धा निरंकुशतृषितः ।
निजपरभिदातीतं धैर्या च्छृते श्शिरसां बलात्
मुहु रपि भृशं गाय त्येनं चिरं बहु मोदते ॥

≡कांभोजी (पुन्नागवराली) रागेण आदितालेन गीयते≡

कलये देव मिद सुखकन्दं कलये देवम् ॥प॥

निगमनिरूढ मखि दृश मेकरसं
प्रजानन्दमुकुन्दम् ॥अ॥

य दशनयादि विकारविहीन मशेष मजर मनन्तम्
इह मुनयो मृगयंति शमादिभि रांतर मेन मनन्तम् ॥

इह परभोग ममरपदवी मपि यदधिग मेन भजन्ते
विष मिव धीरधियो ऽमरमृग्य परैकसुखे विहरंते ॥

निखिलत श्श्रुतयो ऽनुपतंति य मवधितया परदेवम्
अभिलषितं मुनिभि स्सुतपोभि रशेषभवांबुधि नावम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सकलसुधर्म विधर्मकृताकृत भूतभविष्य दतीतम्
निजपरिबृंहित जगदनुकूलतया सततं सुविभावितम् ॥

प्रणवतुरीयसुलक्षित मक्षर मात्मतया यदनन्यम्
य दय मनुस्मृति स्वय मव्यय माशु सविंदति धन्यम् ॥

य दधिगमा दिह जन्ममृती हननादिभयानि तरंति
पुन रिह मोहविजृंभित मेत दतो मुनयो न भजंति ॥

विरतिशमादि विहीनदुराप मबोध सुबोधसमानम्
य दवगति प्रतिषिद्ध मबोधविजृंभित माहु रिहैनम् ॥

विभु मशरीर मशेषशरीर गुहासु निविष्टचिंदशम्
व्रजयुवतीजनवल्लभ मात्मतया परिशिष्ट मधीशम् ॥

फणितमनन्तपरायण शिव नारायणतीर्थे नेदम्
निगमशिरोरस भावनया गतमत्सर हृदयविनोदम् ॥

निर्विशेषचिदानन्द माविर्भून निजेच्छया ।
कृष्णभावेन बुद्ध्यादि तत्त्वभूषं जगुश्च ताः ॥

बुद्ध्यादि तत्त्व परिचिह्नित गोपवेषं
सिद्धानुभावित मशेष जगन्निदानम् ।
नासाग्रलग्न नवमौक्तिक चन्द्रबिंबं
बिंबाधरं भवभयप्रशमं नमामि ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

≡ केदारगौल (नीलांबरी) रागेण अटतालेन गीयते ≡

माधव मा मव देव यादवकृष्ण यदुकुलकृष्ण ॥प॥
साधुजनाधार सर्वभाव माधव मा मव देव ॥अ॥

अंबुजलोचन कंबुशुभग्रीव बिंबाधर चन्द्रबिंबानन
चांपेय नासाग्रलग्न सुमौक्तिक शारदचन्द्र जनितमदन ॥

कपटमानुषदेह कल्पितजगदण्डकोटि मोहित भारतीरमण
अपगत मोहतदुद्भव निजजन करुणया धृतदेह सुलक्षण ॥

तरलकुण्डल रविमण्डल विकसित निजजनमानस पंकेरुह
करुणाहासलसुधा निधिकिरण शमितभव तापसजनमोह ॥

मुरलीगान रसामृतपूरित व्रजयुवती मानसार्णव भो
सरसगुणार्णव तीर्णभवार्णव सततगीत कीर्तिमंडल भो ॥

शंखचक्राब्ज शार्ङ्गगदाखड्ग वैजयंतीकौस्तुभादिभूष
स्वीकृतवृद्ध्यादि तत्त्वसमन्वित दिव्यमंगल गोपबालकवेष ॥

आगम गिरिशिखरोदित सत्य चिदद्वयलक्षण सुखभानो
भोगिकुलोत्तम भोगशयन दुग्धसागरजा लक्षणाढ्यतनो ॥

इंदिरया सह सुन्दरकृष्ण पुरंदरादि वंद्यपदकमल
नन्दनन्दन योगिवर्य धुरंधर नारायणतीर्थ मतिविहार ॥

——

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सानन्दंनन्दसूनुंसकलजनिमतां सारमारादुपास्यं
दास्योलास्यंरसाढ्याः करतलकलितैस्तालवाद्यैस्सुगीतैः ।
कुर्वंत्योनिर्विशंकाः कुवलयसदृशो दिव्यताटंकवत्यः ॥
बृन्दारण्येभजन्ते सुरवरवनिता स्तंजगुस्स्यंदनस्थाः ॥

≡मध्यमावती (भैरवी) रागेण, आदि (जंपे) तालेन गीयते≡

गोविंद मिह गोपिकानन्दकन्दं
सानन्द मवलोकयामो मुकुन्दम् ॥
गोपिकागणनयन कुमुदपूर्णेंदुं
गोपालकुलतिलक मखिलजनबन्धुम्
श्रीपति मनिंद्य हरिचन्दनसुगधिं
श्रेयोविधायि करुणारससिंधुम् ॥
संगीतरसरसिक सरससल्लापं
सरलमुरलीगलित साधुसंतापम्
शृंगार रसपूर श्रीमदनगोपं
श्रितजनानन्द मखिलानन्दरूपम् ॥
अंगनामुखपद्म संगिभृंगाक्ष
आलोलमकरकुंडल नटनदक्षम्
मंगलाकर मखिललोक संरक्षं
माधव मशेषसुररिपु गणविपक्षम् ॥
वल्लवीमाणिक्य मणियुगलखेलं
मरकतमणिच्छायं मदनगोपालम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

मल्लिकाजाजि चंपकादि सुमभारं
महनीयलावण्य ललिततरपूरम् ॥

स्फुरदधरकलित मुरलीनादसुधया
सुरसुन्दरीगणं कर्षयति कृपया
गुरुकरुणयारचित मेत दतिललितं
नारायणानन्द तीर्थसमुदितम् ॥

ध्रुव मठ मुखमुख्यै स्तालभेदै रटंत्यो
वनभुवि वरनार्यो रासगोष्ठीगरिष्ठाः ।
अलघुलघुपदादि न्यासभेदै श्च नाट्यैः
सरस मभिनयंत्यो नन्दसूनुं भजन्ते ॥

मुहु रपि सुरनार्यो रासलीलाबिलासं
जगु रिति दिवि दिव्यस्यन्दनान्दवत्यः ।
अभिनय मपि तासां वल्लवीनां मुरारे
रधिक मभिनयंत्यः पुष्पवृ ष्ट्याचयंत्यः ॥

= नाटरागेण ध्रुवतालेन गीयते =

ध्रुवमंडलमंडित वधूजनमंडल महोन्नतं
भवसागर तारकगिरां परिभावुकसुलक्षितम्
द्रुतमध्यम मन्ध गी रवलोकनसुन्दरीः
कृतपुण्यफलात्मक नृहरिं परिपश्यत व्रजौकसाम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

त्रिपताक पताकसुकरैः कटकामुख शिलीमुखैः
परभावरसोत्कटपरै रपि वीक्षणसुशिक्षितैः
तनुमध्यनियोजितकरै रपि नाट्यरसोत्कटाः
नारायण तीर्थकृतं हरि रिति यतिजनतोषम् ॥

— —

तांतककिणतधिमितकिटततझणुतकिटत - तकधरिकिटझणुताहतधण धिमिधिमिनुतकिटतधिमितकिटतक झणुताकिटतकधणता- तक धणांतकिटझन्तरिकिटतकझं - णंतरिकिटतक - दणंतकिटत झंतकिट - धिंगुड्डतधैय्यत्तक - धाकिटतकझं - तरिकिटतकध लंगुतकझंतकिट - तकतधिमितकिटधणधिमिधरितक - ततकिट तकतकझणुतधणतद्धिमि - तकदधिगिणधों

=मध्यमावती रागेण, मध्यतालेन गीयते=

जगदीशं पश्यत सुरवनिता
व्रजांगनाभि रिह नवनवमणिदिव्य
कुंडल तरणि निचय शशिगणसंजात
श्रीजितसत्यलोक विचित्रभूति रयं
लीलामय दिव्यसुन्दरमदन
कोटिविलसिततनु र्वसुधाराशि र्नृत्यति भुवि
निजदासवर्ग सुखकर कृपांबुराशि रेनम् ॥

——

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

तकधीनुतजककिणणकधिघणकिणणकधिकितधिमित - झणुतद्दणतद्धिमितकिटतकतों- धरिकिटदिंधिंगुड्डुतद्धैय्यतदधीनुतधी- तकणकझंतरिकुन्तरि- तकिटझन्ततकधणन्तरिकिट - धाकिटतकझन्तरिकिट तकताहतधिकितक - तधिमितकिट- तकझणुतक धिमितधिमित तकदधिगिणदों

≡ तोडी (मुखारी) रागेण, रूपक तालेन गीयते ≡

नित्यानन्द मिह पश्यत नरसिंह
व्रजवधूभि रधिलास्यकृतं
भक्ताना मभयदं भवबन्धनविदलनं
मुनिवर्य मोक्षैकफल वेदविदितं
इंगित लिंगिदयासुधया परिमितमुदा
गोपीजन मनसिजानेकरूपधर मिह
परिपालित निजजनं निरवधिक करुणारसम् ॥

——

तझन्तकझणुतक- तधिमितकिटधणधिमितकधगिकिटझणु- तझन्तधी- तकगधिमित- किणझन्तरिधणता- झणुताहततधिमितकिटझणु - धिकितकघणधिमितरितघणततधिमितकिटधाणुन्धणंतधणन्तझणुंतकझन्तरि - तद्धलंगुतकझणु - तकधिमिततकिटतकतकझणुत - तधिमितकिटधिनुत - धणधिमितकदधिगणधों

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

=पंतुवराळी (वराळी) रागेण जंपेतालेन गीयते=

सुरलोकवनिता स्समवलोकयत देव
मखिललोकाधार मधिकतरलीलम्
शरणागतत्राण कलितसंकल्प मिह
वनभुवि महोल्लास रासरसरसिकम्
व्रजपुरवधूकलित विविधतालमृदंग
संगीतरसविज्ञ मखिलसारज्ञम्
उदयविलयातीत रसघन मचिंत्यं
सदयहृदयालोक कलितकैवल्यम्
अधिकतर साहसोत्साह गांभीर्यं
विधि मुखधिमृग्यपद विमलविज्ञानम्
कनककटिसूत्र वलयांगदपटीरं
कलितकौस्तुभशोभि कमनीयकंठम्
श्रीवत्सलक्षण मशेषसुररक्ष
श्रेयसा मास्पद मशेष भुवनानाम् ॥

तंदिरिनादिरिनाद्रिंद्रिंनुतक - तधिमितकिटतकझणं - तगणंतद्धिक्किट
तकनंधिक्किटतक - धिंधितत्तादि - तत्तारि - गिणगणांकिण -
तोदिंगिदिगी - धादुगुदुगुजंजतजं - तद्धिमितझन्तरितधणां -
धाणुघणझणुताहन्त - तधिमितकिटझन्तकझं - जणुताहतजन्तरि
तधिमितकिटतक - घणधिमिझणुतकदधिगिणधां

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

≡श्रीरागेण त्रिपुटतालेन गीयते≡

गोपाल माकलय सखि हे गोपिकायुतमंडली
चंडभानुसमग्रमंडल नियतदेव नित्यबोध
मखिलसार मादिदेव मतुललील ममरगीत
मप्रमेयपराक्रमनित्यशुद्धसुखैकविग्रह मच्युतं

ततग्धीधिनुत - झन्तरितधिमितकिट - तधिमितझं - तझं - धणां
झणुंघणांदिमितधीधणतकतधिमितकिटझणुततकिट - धिकितक
झणु - धगधिमि - तधिमिततकधणत- झणुताहतधिमितजणुत -
तकधरिकिटजणुततद्धिमितकिट- धिकितकजणुतकतकतधिगणधों

≡आनन्दभैरवीरागेण विलंबतालेन गीयते≡

कलयत सुरवनिता मदनगोपालं
अनुपमलावण्य सरिदेकनाथम्
वनभुवि रवितनया तटिनीतट
हरिचन्दन लवंगलतादि विलसितम्
निरुपमराग रसोल्लसित वल्लव–
युवतीजनमानस कुमुदपूर्णेंदु
मृगमदतिलक कलित फालसुन्दर
श्रमजलकण मुक्ताफलजाल सरसम्
चरणकमलगत मणिमयनूपुर
मधुकरमदनिचय शिक्षागुरुम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

मन्द्र मध्यम लघुतर गतिभेद
सुन्दरा स्य नंदित युवतीबृंदम्
हरिचन्दन तुलसी कमल केतकिकुन्द
कुसुद पारिजातादि कुसुमसुगंधिम् ॥

तां तक्किणकिणतकजं - तकजन्तकुं तरि - तद्दणन्तद्दणांतद्धिनुत - धणतद्धिमितकजन्त - तकजन्त तद्धणांतघिमितक - ताहुजंतरि धणांजणुता - तकिटजन्तकजन्तघिमितक - जणुतधणघिमि - तजन्तकिटतकजंकिणजं - तकघित्तकजं - जणुताहत - धणघिनु त- तजणंततधणत- तद्धिमित किटतकजणुतकरेतकदघिगिणधां

≡सौराष्ट्ररागेण एकतालेन गीयते≡

कलयत वनभुवि कमलेक्षण मिह
कलितललित मुरलीकलनिनदम्
कल्पितबहुविध कामविशेषं
करुणारसघन मनुपमवेषं
कल्याणाकृति कृतबहुखेलं
श्रीगोपालक रासक्रीडा
सिद्धमहोत्सववर्णन मधुना
शिवनारायण तीर्थसुघटितं
स्थूलादिक मिति हरिगुरुकृपया

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

तकजं - तकघीघिनुतजं - तद्धिमितक्किट - जणुधणतां - तककिण जंतरि - धणघिमितघिमित- तकधरिकिटजणुतद्धिमितद्धिन्नांतक जणुततकिटतघिमित - घिकितक्कजणुताहतघिमितकिटजन्तरि - तकजणुतकनकदघिगणघों

अङ्गप्रत्यङ्गगौण स्फुटसमविषम
व्यंजकव्यक्तिसिद्धैः
श्रृंगाराद्यै रनिंद्यै रधिक मभिनयं
व्यंजयंत्यो युवत्यः ।
रासक्रीडाविलासै र्वनभुवि नितरां
माधवं तोषयंत्यः
तुष्टाः स्वैरं रमन्ते चिर मिह गुरुणा
श्रीधरे णाप्तकामाः ॥

इति श्रीनारायणतीर्थ विरचितायां श्रीकृष्णलीलातरङ्गिण्यां
श्रीकृष्णरासक्रीडावर्णनं नाम सप्तमतरङ्गः ॥

———

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अष्टम स्तरङ्गः

कथा संग्रहः

अष्टमे गोपिकागीतं आदरे णाभिनीयते ।
गोपीभि स्सह कृष्णस्य रहस्यागमनं वने ॥
अंतर्धानं च कृष्णस्य ततो गोपीप्रलापनम् ।
कृष्ण स्यान्वेषणं भूय स्तासां श्रीकृष्णदर्शनम् ।
एत च्चरित्र मधुना संगृहीतं हरेः क्रमम् ॥

गोपिका गीतानि

आनन्दं नन्दयन्तं हृदयगत मविद्याश्रयं नादगम्यं
प्राणादीन् षोडशारान्वित रथचरण स्यार्पित न्नभिदेशे ।
आकाशादीं श्च सर्वा न्निजपरिकलया जृंभितान्मायया तं
गोपीमध्ये मुकुन्दं व्रजपुरवनिता कापि गाय त्युदारम् ॥

≡आहिरी रागेण, आदितालेन गीयते≡

भावये सखि हे
भावये सखि भावदश मीशं ॥प॥
मधुरिपु मिह रासभुवि विहरंतं
माधव मिंद्रियादिषु वसंतम् ॥अ॥
दिनकरमंडलगं सुतपन्तं
विश्वतनुं विषयादिषु संतम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

सकलविषय मनुभवति य देकं
यत्र तदा निज मेति सदा कम् ॥

पवनगत मखिलकारण मादिं
प्राणतया परिपीत मनादिम् ॥

य मवधि लय मनुयाति तु तारं
तं पर मव्यय मागमसारम् ॥

अर मिव रथचरणस्य पिनद्धं
यत्र कलानियमेन सुसिद्धम् ॥

निगमविचार जनित मतिगम्यं
जन्मलयादि रिहित मतिरम्यम् ॥

अभिनवजलधर सुन्दरदेहं
वारित गोपवधू जनमोहम् ॥

हरिगुरुपरिजन हृदयविनोदं
नारायणतीर्थ फणित मि हेदम् ॥

——

सर्वप्रत्यंच मेकं प्रकृतिमखिलभावं स्वयं भासयन्तं
नित्यानन्दस्वभावं सकलहृदयगं व्योमव न्निर्विकारम् ।
आचार्यस्य प्रसादा द्विदु रिह मुनयो वेदभागे मुकुन्दं
नृत्यंती गायती ति व्रजपुरवनिता भक्तसंकल्पसिद्धम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

=मुखारी (वराली) रागेण, आदितालेन गीयते=

श्रीनिलयं सखि श्रीनिलयं
धीमहि गोपी मानसनिलयम् ॥प॥
गगन पवन मुख भूतनिधानं
प्रियतम मागम मृगित मि हैनम् ॥
य दभिसृजति जग दवति पुनाति
ग्रसति चिदात्मतया सुविभाति ॥
दिव्यतनु मजर ममर मसंग
अंतर्बाह्यततं जगदंगम् ॥
अनुकलित श्रुतिवाच मधीशं
दिनकर शशधर लोचनदेशम् ॥
विश्वहृदय मवनीपद मादिं
प्राणतया परिपीत मनादिम् ॥
विश्वनगरवर राज मराजं
विविधकलाकृत जीवसमाजम् ॥
मुहुरपरं परिबृंहितभावं
निजकलया परिहृतभवभावम् ॥
व्रजयुवतीजन कृतपरिहासं
वनभुवि मुनिवर हृदयनिवासम् ॥
बुधजनमानस मंडनभूतं
इद मिह नारायणतीर्थ गीतम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

इति गोप्यः परानन्दं गायंत्य स्ताः पृथक् पृथक् ।
अपराः श्रुतयो भूयो भूय स्तत्रैव संगताः ॥

श्रीकृष्णस्य अंतर्धानम्

कदाचिद्गोविंदे गतवति परानन्दसदनं
निराकारं धाम स्वक मिति च विज्ञापयति ताः ।
तदाकारं साक्षा त्पर मधिगताः कृष्णरसिकाः
पुनस्तं गायंत्यो रहसि मृणयंति प्रियतमम् ॥

कृष्णान्वेषनम्

≡शंकराभरण (कांभोदी) रागेण, अटतालेन गीयते≡

मृगयत राधामाधवं सखि
मुहु रिह निगम वने धवम् ॥प॥

अनुपद मखिलफलप्रद शाखिषु मृगितमदृष्टमनन्तम् ।
क्वचि दपि गूढतया निजधामनि कृतसुकृतै रनुभूतम् ॥
य दखिलदूरत रेपि य दंतिक मत्मतया वियदादिम् ।
अनुगत मधिगत मागमपार मनन्यमनोभि रनादिम् ॥
स्वयमवगति रवगन्तृ नियन्तृ य दखिलजनस्य निरीहम् ।
श्रवणनयन वचनादि दुराप मपुण्यवतादि दुरूहम् ॥
य दनुमनसि परिधावति धावति दूरत येह दुरंतम् ।
विभुतर मखिलजनांतर बाह्य मखंडचिदात्मतया तम् ॥
य दखिलभूतनिदान मवैति तदात्मत यात्मनि सर्वम् ।
स तरति शोकमहोदधि माशु विवर्जित मानुषगर्वम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

चलति जगति यदचंचलमातत मुपविनिहित जगदंडम् ।
प्रभवति भवति पिनद्ध मिदं निजमायिक मेक मखंडम् ॥
असुरधिया मतिदुर्गम मप्रिय मात्महनो हि परं ते ।
इति निगमा जगु रेन मप र सुखैकरसं न भजन्ते ॥
कुवलय दलरुचिर कृति मन्य मनोभि रुपाहृतदेहम् ।
गुरुकृपयाहृत गोपवधूजनशोक मपाकृतमोहम् ॥
श्रुतिशिरसा मनुभूषण मद्वय मात्मरतिप्रियशेषम् ।
मुररिपुभावरसिकवर नारायणतीर्थ फणित मदोषम् ॥

इत्थं गोपीजना श्शौरेः परभ वविदः पुनः ।
भुवि शिक्षां वितन्वंत्यो मृगयं त्यादिकारणम् ॥
सर्वांतःकरणांतस्थं माधवं प्राणवल्लभम् ।
मृगयन्ती र्वने पुष्पैः हसंत इव पादपाः ॥
मल्लिकादिलता स्तद्व दोषध्यो ऽन्याश्च तद्वने ।
संबोध्य नामभि स्तेषां ता नाहु र्वल्लवांगनाः ॥

≡कांभोजी (भैरवी) रागेण, आदितालेन गीयते≡

माधवं दर्शय हे मन्दार माधवं दर्शय ॥प॥
माधव मिह राधिकाराधित मथ
साधकजनफल साधक मधुना ॥अ॥
रे रे मन्दार संतान कल्पक पारिजात चन्दन
रे रे चंपक नागपुन्नाग श्री पूग पनस नारिकेल रसाल ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

सरस कदंबक पलाश कुरवक वटसमूह
विलसदशोक कपित्थ कदलीवन ललित देवदारुबृन्द पिचुमन्द ॥
बृंदे बृन्दावनचर महर्निशि नन्दनन्दन मतुलं
कुन्द लवंगलते कुटिलालक मिन्दुसुन्दरानन मीश मतिबलम् ॥
फुल्लकुसुममल्लिके जाजि मालतीवल्लि वनज लतिके
कल्लोलश्रीकमल केतकीकुमुद कल्हारादि कुसुमचय पंक्तिललिते ॥
शुक कोकिल शारिकाबृन्द शकुन्त शोभन हंसकुल
प्रकटाकाशानिलानल जलधरणि सकलदेवगण सरसगुणगण ॥
सकलनिगमगूढ मणिललोकाधार मच्युत मखिलगुरुं
सरसगोपीगण परिगीत मनुशिव नारायणतीर्थ फणितमुदारम् ॥

गोपीषु मृगयन्तीषु वने गोपालनन्दनम्
आत्मानं दर्शयामास चिकीर्षु र्भूयनुग्रहम् ॥

अथ खलु वल्लवयुवत्यो निजवल्लभविरहसंतापजनित दुरंतचिंतासंताप मंदीकृतबाह्यविषय विवेकवृत्तिमच्चित्तवत्यो मुहु र्मुहु स्तदीयलीलाविनोद नवरसाविष्करणप्रवीणाः गोपांगप्रत्यंग गुणगण समविषमबलाबल समबल विलासविलसित ग्रीवाशिरःकंप त्रिभंगीललितदिव्यगात्र भ्रूनेत्रहस्तविशेषा द्याविष्कृतनवरतसालंकारालंकृत विविधलास्यविशेषं स्फुरदधरमणिपरिमिलित मुरलीकलरवसुधावधीरित सुरसुधाखंडमंडलं स्मारं स्मारं स्वस्वांतःकरणानपायेन सर्वांतरंग मदनशतकोटिसुन्दरांग

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

ध्यायंत्यो मनसा प्रणमंत्य शिरसा वचसा च पुरःस्थित मिव संबोध्य प्रत्येकं गोपाल मगायन्त ।।

मदनशतकोटिवेषं माधव माधाय मामके मनसि ।
विदलितसुररिपुबृन्दं विष्णुं गायामि विश्वभर्तारम् ।।

≡सौराष्ट्र (मोहन) रागेण, आदितालेन गीयते≡

नन्दनन्दन गोपाल जय नवनीतचोर गोपाल ।।प।।
कन्दर्पशतकोटि सुन्दर सुखकर मन्दहास श्रीगोपाल ।।
बृन्दावन गोबृन्दघनानन्द चन्द्रानन श्रीगोपाल ।।
लीलामानुष बालकवेष बलानुजविग्रह गोपाल ।।
मुरलीधर मुनिबृन्दविचिंतित मुक्तजनाश्रय गोपाल ।।
नन्दसुनंदादि वंदितचरणारविंद महोन्नत गोपाल ।।
बाधितरिपुबृंद बोधरसानन्द साधितजगदंड गोपाल ।।
गोपीमन्मथ गोपरिपालक गोवर्धनोद्धार गोपाल ।।
रासमंडलनट दासजनावन वासवादिनुत गोपाल ।।
मूलकारण मोहवारकलक्ष्मीपाल पराधीश गोपाल ।।
घोरभवार्णव तारकपालित नारायणतीर्थ गोपाल ।।

———

माधवचरणसरोजे वनभुवि सिकतासु रेखया ऽनुमिते ।
दृष्ट्वा तदनु च तन्व्या श्चरणौ कस्या इतीतराः प्राहुः ।।

काचिद्गोपी कनकलतिकाकांति रंतादिहीनं
कांतं स्वांतःस्थित मनुगतं कामकामं श्रयन्ती ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

लक्षीकृत्य श्रुति रिव परानन्दमूर्तिं प्रगल्भा
नृत्यंती गाय तीति प्रकृतिपरतरं मृग्यमणे मुकुंदे ॥

≡केदारगौल रागेण, आदितालेन गीयते≡

नन्दमुकुंदे परमानन्दे वय मिह किमु मृगयामो ॥प॥

विहरति गोपे गतभवतापे का मनुसरति दुरापे
क्वचि दपि नीते हृतनवनीते निजकलया सुविभाते ॥

अमृतकलाया मतिविमलाया मचलविभूतिनिदाने
स्वसुखरताया मतितरलाया मनुपद मिह मनुमाने ॥

कृतजगदंडे सुखचिदखंडे सकलजगत्प्रतिभाने
श्रुतिपरिगीते महदनुभूते निजसुखसाधितमाने ॥

नभसि सदंशे मनसि चिदंशे पश्यति वितत मशेषम्
प्रकृतिकृनादिं रथतुरगादिं भानुसदृशकृतवेषम् ॥

मनसि विलीने गतवतिमाने कलयति रति मिह देवे
निजपदगतया सकृ दभिमतया सहगतनिजपरभावे ॥

अपगतकामे जगदभिरामे जडजसमस्तविरामे
अनुकृतवामे विगलितभीमे भीतभवनरविसोमे ॥

व्यवहृतिहीने महदभिधाने बोधलयादिसमाने
प्रणवतुरीये शिवपदमेये नादलयावधिमाने ॥

विगतकलंके परिहृतशंके गलितपरापरभेदे
विनिन्दितशोके कृतपरिपाके गोपवधूजनमोदे ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सदसदतीतं सततविभातं केशवपरतरभावम्
अनुपरिगीतं निगमसमेतं नारायणतीर्थे नेदम् ॥

पाणा वधाय पाणिं व्रजपुरवनिता कापि कस्याः प्रगल्भा
ग्राह्यं गृह्णन्त मंतर्बहि रपि विततं स्वानुभूतिप्रसिद्धम् ।
सिद्धं वेदाग्रभागे तदनुगुणनयैः ब्रह्मवित्सु प्रसिद्धं
नृत्यंती गाय तीति प्रकृतिपरतरं मानतो दर्शयन्ती ॥

==मध्यमावती रागेण, अटतालेन गीयते==

देवदेवं केति तं मृगयामो वय मिह ॥प॥
दृश्यवस्तुषु दृक्तया सततं सति प्रतिभाति
प्रत्यगात्मतया ऽपि बुद्धिषु नित्य मेव पुनाति वय मिह ॥
प्राण बुद्धि लयोदया दपि भासय त्यमलेन
स्वप्रकाशसुखात्मनोदय हानिधीरहितेन वय मिह ॥
येन विश्वपदाभिधान इ हैकता मनुयाति
तत्र सर्वसुखैकरसे परात्मनि भाति वय मिह ॥
चिंत्यते यदचिंत्यरूप तयैव योगिवरेण
संततं हृदयांतरं सखि भाति धीरवरेण वय मिह ॥
नन्दय त्यखिलं जनं निजनित्यबोधसुखेन
छन्दसा मखिलाग्रभाग विनि श्चितेन समेन वय मिह ॥
पौरजानपदानुगो रमते नृपो हि यथैव
प्राणबुद्ध्यनुग स्तनौ विकृतिं विभाति विनैव वय मिह ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

राजव त्फलमात्रभोगितया तनौ सुविभाति
बालव द्विगतानुरागतया ऽपि यो न बिभेति वय मिह ॥
गोपनीयतया ऽपि गोप वधूभि राभि रमानि
श्रीमद् त्मकभाव भावनया स एव भवानि वय मिह ॥
वेदभाग विचारजात मति प्रियप्रणयेन
वर्णित शिवरामतीर्थपदांबुज भ्रमरेण वय मिह ॥

मूर्ता मूर्ते य दनुवितते मायया यस्य रूपे
सच्च त्यच्चे त्युभयरस इ त्यागमोक्तो य आत्मा ।
नेती त्येवं यद्वधि जगद्बाध्यते यस्य दृष्ट्या
सर्वोत्कृष्टं त मिह मृगयं त्याह गोपी मुकुन्दम् ॥

≡कांभोजी (हुसेनी) रागेण, आदितालेन गीयते≡

सहचरि समरस मिह मृगयन्ते ॥प॥
सज्जनसंग रता मुनयो भुवि निगम शिरस्सुखदं ते ॥
गिरितरुसागर सरिदपरात्मतया सति भाति मुकुन्दं
सुर नर मृग खग रूपतया ऽपि विभाति चिरं सुखकन्दम् ॥
इह मधुमाधवमुखर्तुवत्सर रूपतया ऽपि विभाति
दिनकरतारनिशाकरपावकभूजल भावमुपैति ॥
गगन मरुद्विविधात्मतया ऽपि परात्मनि सर्वदृगंशे
अह मह मित्यनुभूति विशेषण भूततया ऽनुभवांशे ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

इद मिह दृश्य मदृश्यतया ऽऽत्मनि भासयति स्वविभाते
अपहृतशोकभये गगनोपम देहतया ऽखिलभूते ॥
जगदुपमर्दित माग मभाग विचारधिया पुन रेतम्
चिरमविवेक समर्पित मात्मनि यत्न जनै रनुभूतम् ॥
धनपशुपुत्रकलत्रफलानि यदर्थतया भुविसंति
स्वय मपरोक्षतया सकलस्य मह स्युपलब्धरि भाति ॥
सकलजगन्मधुनि स्वय मव्यय बोधतया सुविभाते
अमृतर्ते जगति व्यय मेति सदात्मतया ऽप्यनुभूते ॥
व्रजयुवतीजन वल्लभभाव मुपेयुषि नवनवजलदाभे
नवरसशालिनि शुभवनमालिनि कामिनि कनकलताभे ॥
मुररिपुभावरसाभिनिवेश जनांतरभूषणभूतम्
अधिगतबोधनिदान मिंद शिवनारायण यतिगीतम् ॥

मधुत्वेन च यत्सिद्धं भूतभौतिकवर्गयोः
सो ऽयं साक्षात्परानन्दः सहचर्या ऽनुवर्तते ॥

अथ राधामाधवसंवादः

≡मध्यमावती (नादनामक्रिया) रागेण, जंपेतालेन गीयते≡

राधा - कलभगति कलितघन कालमेघाभ
कलय मम रहसि कुतुकानिसुबहूनि ॥
कृष्णः - कलहंसगामिनि त थैव करवाणि
कथयसि यथा सपदि कथय पर मद्य ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

राधा - विमलकल्याणगुण विविधविश्वात्मन्
विगलितदुकूल मथ रचय मम सुदृढम् ॥

कृष्णः - बांढ मबले तव दृढं विरचयामि
हाटकदुकूल मायाहि तरुमूलम् ॥

राधा - रचय मृगमदतिलक मतिललित मद्य
कुचकलशयुत मपि सकुंकुमविलेपम् ॥

कृष्णः - रचयामि तिलक मपि तव ललितफाले
कुचकुंभयुगले ऽपि कुंकुमविलेपम् ॥

राधा - गलितकचनियम मथ घटय मम कृष्ण
गमय मा मिह रहसि केशव कृपालो ॥

कृष्णः - एहि मम हृदय कुतुकं कलय राधे
इह समुपविश रहसि देहि मुद मद्य ॥

राधा - कुसुमनिचयापचय मद्य करु कृष्ण
कुंतलभरं घटय मम कुसुमभारैः ॥

कृष्णः - मम रमणि कुसुम भारै रलंकुर्वे
सुमशर शरासन समं तु कचनिचयम् ॥

राधा - सरस वरगंधि सुर सालफल वर्गं
निरवधिसुखं देहि नियतमपवर्गम् ॥

कृष्णः - निरुपमफलानि च गृहाण सरसानि
निर्विशंकं विहर मम हृदय रमणि ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

राधा - पानीय मानीय तां त्वया मह्यं
पातुं पिपासा हि भूयसी मम भो ॥

कृष्णः - मधुरं पयः पिब मधूनि सुबहूनि
मम वल्लभे तृप्ति रस्तु तव सुतराम् ॥

राधा - अधरसुधया मम मनोरथ पयोधिम्
अधिक मिह पूरय कृपापारजलधे ॥

कृष्णः - कलय वरवर्णिनि त थैव कलयामि
मिलतु तव हृदयं मदीय हृदयेन ॥

राधा - कथ मनुसरामि वनभूमिषु भवंतम्
कथय सुभगा ऽह मबला ऽतीव कांतम् ॥

कृष्णः - अह मिह वहामि तु रमामि च सुशीले
विहितसरसालाप गतमदनतापे
इति कलित मिह राधिकाकृष्ण चरितं
रहसि शिवनाराय णानन्दरचितम् ॥

कदाचि दथ बृंदावने शारदचन्द्रचंद्रिका धवलितकालिंदीपुलिन नलिननाभचरण नलिनांकरमणीयभागे विस्मृतपतिपुत्र बांधवा स्तत्र गायं गायं संचरंत्यो मधुकरा इव माधव मभिलषंत्यो विलपंत्य श्च रह स्याराधितमाधवां राधां क्वा प्युपकुंजं माधवविरहव्याकुलांतरतया चोन्मादावस्थायां स्थितां सर्वा गोपयुवत्यो ददृशुः इत्थं च तां पप्रच्छुः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

≡ कल्याणी (आहिरी) रागेण, अटतालेन गीयते ≡

कथय कथय माधवं हे राधे
कथय कथय माधवम् ॥प॥

अथ सखि कथय श्रीमधुसूदन मशेष
विधिना वर्णितवीर्य ममितविभवम् ॥अ॥

वनभुवि रहसि समाराधितो भगवा
ननवद्यसुन्दरांगि हे राधे
घनजघनया त्वया घननीलकुन्तलश्री
वनमाली पीतवासा वसति कत्रा जगति ॥

मृगमदकलित तिलकफालसुन्दरं
अगणितसुगुण मणिरत्नाकरं
विगतमोह मखिलवेदभागविदितं
भगवन्त माश्रितभावुक विधातारम् ॥

सरसहास परिहास सरसकल
मुरलीमिलित गोपवधूजनं
अरविंदलोचन मरिवर्गसूदनम्
वरनारायणतीर्थ वांछितफलनिदानम् ॥

——

अथ चिरपरिभुक्ता शौरिणा ऽखंडरूपा
निजसुखपरितृप्ता ब्रह्मविद्येव गोपी ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

व्रजयुवतिभि रुच्चैः प्रार्थिता साभिलाषं
हरिपरतरभावं दर्शयं तीद माह ॥

= रेगुप्ती (धन्यासी) रागेण, अटतालेन गीयते =

हरि मेकरसाकृति मधुना अवधारयतागमविधिना ॥प॥
चिरतरपुरुषं प्रतिभावपुषं परमिहवियदाततम्
प्रशमितकलुषं भवरोगभयमुषं प्रत्य गभेद मनन्तम् ॥
इद मिति सकलं जगदतिचपलं मायिक मधुनातनम्
परिणतिविकलं फल मिव विपुलं कलयत परिशोधनम् ॥
विलसित मखिलं गुरुतरलीलं यद्वदबोधविधम्
क्षण मिह विदितं सत्पुनरुदितं पश्यत पुरतो हितम् ॥
अनुदयविलयं प्रियतम मभयं जगदुदयादिदृशम्
य दवधि विदितं सकल मभिहितं नियत मबोधवशम् ॥
असुकृतदुरितं फलयुगरहितं केवलबोधात्मकम्
चिर मिह मृगितं मुनिजनविदितं निरवधिकसुखात्मकम् ॥
य दपृथ गखिलं निगमभागफलं भाति हि परदैवतम्
न भवति भूतं न च भावि सततं सुकृतिभि रभिभावितम् ॥
निरवधिविभवं नियतानुभवं भूमपदे नेरितम्
फल मिव करगं सकलहृदयगं तत्त्वधि याखंडितम् ॥
अवचन ममतिं गतलोभरतिं निरतनिस्ताखिलम्
व्रजपुरवनिता गततनुममताः स्वात्मत यै वामलम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

इद मिह फणिंत निगमै रनुगतं कृष्णरसैकात्मना
हरिगुरुकृपया निगमजसुधिया नारायणतीर्थेन ॥

एवं गोप्य स्ततः श्रुत्वा समाधाय परात्मनि ।
कृष्णे चिंत्त तदाकाराकारितं मौन मास्थिताः ॥

विस्मरंत्यः स्वकं देह मात्ममात्रावशेषितम् ।
बलोन्मत्तादयो यद्व दात्म न्येव समाहिताः ॥

कृतकृत्या स्तदा दृष्ट्वा सर्वयोगेश्वरो हरिः ।
तासां तु पुरतः कुर्व न्नास्ते मायाविडंबनम् ॥

मुग्धाः स्निग्धांतरङ्गा मुर नरकरिंपु मूर्तिमत्तार्तिहन्तं
कामानां कामरूपं कलितनवरसं कालमेघाभिरामम् ।
दृष्ट्वा हृष्टास्सुतुष्टा झटिति मुरभिदं वेष्टयन्तो यथेष्टं
त्वालिंगन्त्यों ऽनुरक्ता श्श्रुतय इव परब्रह्मगोप्यो जगु स्तम् ॥

≡ कांभोदी रागेण, आदितालेन गीयते ≡

नाथ नाथ माकलय नन्दनम् ॥प॥

माधव मखिलगोपी मदनकोटिमोहनम् ॥अ॥

पादपल्लवकलित पद्मकुलिशादिरेखं
वेदवेदांतविदितं विपुलसुखदम्
सादर मखिललोक साधकतया भुवन
नाथ ममरेंद्रवन्द्य नटनविनोदम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

बृन्दावनभुवि गोपीबृन्दानन्द संदोहश्री
कुंदसुन्दर रदनमन्दहसनम्
इंदिरासेव्य पादारविंद भक्तिमकरंद
नंदितामर भूसुर नन्दनन्दनं सखि ॥

कुटिलालकशैवाल भ्रुकुटिभुजग नयनशफरि
पटुतरलावण्यरस तटिनीनायकम्
निटलसुन्दर कस्तूरिचटुलतिलक नंदितश्री
घटित नारायणतीर्थ घनपरिपालकम् ॥

उरसा मनसा दृष्ट्या परिष्वज्य मुहु र्मुहुः ।
कृतकृत्या स्त दात्मानं कृष्णं मत्वा समास्थिताः ॥

आत्मारामो ऽपि भगवन् आत्मानं दर्शय न्परम् ।
ततः प्रभाते गोपीभिः सह गोकुल मागतः ॥

इति श्रीनारायणतीर्थ विरचितायां श्रीकृष्णलीलातरङ्गिण्यां
रासक्रीडावर्णनं नाम अष्टमतरङ्गः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

नवम स्तरङ्गः

कथा संग्रहः

श्रीकृष्णलीला मधुराप्रवेशाख्या ऽत्र वर्ण्यते ।
कंसस्यागमनं पूर्वं देवकीवसुदेवयोः ॥

बृदावने ऽथ श्रीरामकृष्णयो स्तदनन्तरम्
नारदागमनं पश्चादक्रूरागमनं ततः ॥

कंस स्यानुज्ञ य क्रूाागमनं कृष्णसन्निधौ ।
श्रीकृष्णदर्शंन तस्य विश्वरूपप्रदर्शनम् ॥
मधुरायां प्रवेश श्च संग्रहो ऽयं प्रकीर्तितः ॥

कंसाक्रूरसंवादः

कंस.गमनम् नारदागमयम्

अथ निवसति तस्मिन् गोकुले वासुदेवे
व्रजयुवति चकोरी बृन्द राका शशांके ।
इति कथयति कंसं नारदे कृष्णवृत्तं
भयविकलितचेताः प्राह कंसो ऽपि दूतान् ॥

मंत्रिभि मन्त्रयित्वा ऽथ धनुर्याग चिकीर्षया ।
अक्रूरं चोदयाम.स कंस स्त्वानयये तयोः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अक्रूरागमनम्

≡नादनामक्रियारागेण, अटतालेन गीयते≡

एकांत भक्तिसंयुक्तः श्रीकांते देवकीसुते
लोकानुग्रहाय सर्व लोकाक्रूरो विराजते ॥

— —

अथ अक्रूरं प्रति कंसवचनम्

मयि द्वेषो दोषः खलु जगति तेषां खल जुषां
महा क्रोषो मे ऽद्य प्रसरति सर त्वं तु झटिति ।
धनुर्यागव्याजा दथ मधुरिपुं रामसहितं
नयास्म त्संदेशा दिह मम सखे ऽक्रूर सुमते ॥

अथ कंसं प्रति अक्रूरवचनम्

महाराज श्रीमन् जगति महिमा ते विजयते
तथा कुर्वे ऽहं त्वं वदसि तु महाराजतनय ।
अमोघं तद्वीर्यं बल मपि च लोके सुविदितं
विधे स्संकल्पः किं फलयति न जाने त्वयि परम् ॥

अथ अक्रूरं प्रति कंसवचनम्

अक्रूर त्वरया गत्वा रामकृष्णा वि हानय ।
बृंदावनं धनुर्यागच्छलेन मम तौ रिपू ॥
अक्रूरे गोकुलं गच्छन् मध्येमार्गं मुहुः स्मरन् ।
कृष्णस्य गुणरत्नानि गायं गायं ययौ विति ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

अक्रूरः वृन्दावनं प्रति गच्छति

≡मध्यमावतीरागेण, आदितालेन गीयते≡

द्रक्ष्यामि गोकुलनिलयं गोपीमाधवम् ॥प॥

प्रक्षीणकल्मषयोगि प्र त्यक्षदैवं नूनम् ॥अ॥

पातकारण्यकुठार पादपंकजं शुद्ध
पादजसलिलपूत भक्तसमाजम्
केतकीचंपकतुलसी ल लितवारिंज श्रित
केवलानन्दैकभावं गलितमोहजं नूनं ॥

पक्षिमृगबृंद मिह याति दक्षिणे पथि
पश्यामि पूर्णकलशं भद्रलक्षणम्
अक्षीण शंखवीणादि नाद मोक्षणं पर
मद्यैव शृणोमि मधुर मखिलरक्षणं नूनम् ॥

चन्दवदनसुन्दरं मन्दहसनं चारु
चंपकनासमरुणार विंदलोचनम्
नन्दनन्दन ममररचित वन्दनं भूरि
नंदित नारायणतीर्था नन्दरसघनं नूनम् ॥

ग त्वाथ यमुनां तस्याः पुलिंन ददर्शे मुदा ।
श्रीहरे श्चरणांभोज ध्वजवज्रादि चिह्नितम् ॥

कलिंदकन्यालह रीह धन्या कलिंदजायाः पुलिंन च धन्यम्
मिलन्मुकुंदस्य पदारविंद प्रसारभाग्योदयतः प्रसन्ने ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अहं च धन्यो यमिबृन्तमान्यो
यदूद्वह स्यांघ्रिसरोजचिह्नम् ।
पश्यामि यस्मा दिति तत्त्व दर्शी
गायत्य धा्क्रपदाभिधेयः ॥

≡ पन्तुवराली रागेण अटतालेन गीयते ≡

धन्यधन्यो ऽहं धरणीतले धन्यधन्यो ऽहम् ॥प॥
धन्यधन्यो यं कालिंदी धन्यं कालिंदीपुलिनम् ॥अ॥

श्रीहरिचरणांभोज श्रीविलसित मतुलं
देहधारिणा मतीव दृष्टिरमणीयम्
गेहबांधव पश्वदि गेहिनीपुत्रधनादौ
मोहपापविनाशनं मुहु रपि दृश्यते ॥

गोपगोपीजनबृन्दं गोकुलजन्तुकदम्बम्
पापतापादिविहीनं परमपावनम्
श्रीपतिदृग्विलासितं श्रेयसा ममितास्पदम्
रूपयौवनसंयुतं रुचिर मिह पश्यामि ॥

शंख चक्र वज्र पद्म चारुपताकादि रे-
खांकितानि भुवि दृश्यन्ते अद्य नूनम्
पंकजनाभस्य यदु पुङ्गवस्य चिह्नानि
शङ्कर नारयणतीर्थ शंसितं हरिगुरुकृपया ॥

———

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

श्रीहरिचरणसरोजे हृदयसरोजे निधाय भूयो ऽपि ।
गायति नन्दकुमारं संबो ध्यानन्यभक्ति युक्तात्मा ॥

≡ विलहरी रागेण आदि तालेन गीयते ≡

भावये हृदयारविंदे	तावकपादारविंदे ॥प॥
देवगन्धर्वादिबृन्द	सेवित मा मव मुकुन्द ॥अ॥
सकललोकनायक	साधुजनतारक
मकरकेतुजनक	मायाधारक
विकटारिविदारक	वेदसमुद्धारक
विकृतभयवारक	विपुलसुखदायक ॥
कनकमयदुकूल	कलितकल्याणजाल
मुनिमानसानुकूल	मुरलीलोल
विनयादिगुणशील	वेदपुराणादिमूल
वीर विजय गोपाल	विगत शोकादिमूल ॥
कलिंदीतटविहार	करुणारस सागर
मेलित गोपीनिकर	मेरुसमधीर
कालीय मदहार	कंसादिभयंकर
गोकुलश्रीमन्दार	कोटिकामसुन्दर ॥
भक्तजन संरक्ष	परमकरुणा वीक्ष
सक्तजन सुशिक्ष	साधुजन पक्ष
रक्तकमल पत्राक्ष	रमणीय चरणदक्ष
भक्त नारायणतीर्थ	भवबन्धनमोक्ष

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अक्रूरः कृष्णं सेवति

बृन्दावने गवां मध्ये गोपमंडलमध्यगम् ।
दृष्ट्वा ऽक्रूरः प्रणम्याथ भक्त्या प्रार्थयते हरिम् ॥

श्रीनन्दगोपतनयाखिलविश्वमूर्ते
श्रीमत्पयोधि तनयाधव कृष्णमूर्ते ।
आनन्दयाखिल मशेषजगन्निवास
मीनांककोटिसमसुन्दर शुद्धकीर्ते ॥

==कांभोजीरागेण, आदितालेन गीयते==

नन्दगोपबाल कृष्ण आनन्दयाखिलम् ।
श्रीचन्दन कुंकुम तुलसी चांपेयदि सुगंधितांग ॥

अजय्य रमणीयलोक आगम बृन्दमानक
भजदार्तिनिवारक भद्रदायक
अजितलोकनायक आदित्यादि शासक
विजितासुरनायक विश्वमंगल दायक ॥

गोपांगनामंडल गो गोप परिपाल
तापस जनलोल तारकागम मूल
श्रीपतेऽनन्तलील शृंगार कृपालबाल
श्रीवत्स चिह्नादिमूल कारणमूर्ते ॥

अतुल करुणासार अखिलजगदाधार
धृतदिव्यपीतांबर दिव्यसुन्दर

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

हृतनवनीतोदार हृदयनिहितेंदिर
श्रितभक्तमन्दार श्रीलसत्कौस्तुभोदार ॥
संततानंदकर साधुजननिकर
चिंतितार्घदोदार चिन्मयामरवीर
सत्यकामचतुर संसारपरापर
नित्यनिगमशिखर नियतविहार ॥
व्यत्यस्तांघ्रिकमल विमलमणिकुंडल
प्रत्यस्तमोहजाल प्रत्यक्दृगखिल
नित्यमुक्तनिर्मल निखिलनिगममूल
भृत्यजनानुकूल आजद्गोकुललील ॥
वैजयन्ती शोभित वामदेवादि सेवित
निजभक्तसुविदित नित्यशुभचरित
ऋजुमांनसललित ऋग्यजुस्सामादि गीत
व्रजनारीपरिवृत विश्वविख्यात ॥
देवादिकृतमोद दिव्यमुरलीनाद
भाविताखिलवेद भव्यभक्तवरद
श्रीवसुधाविनोद श्रितजनमोक्षप्रद
शिवनारायणतीर्थ सेवितपाद ॥

— —

मुहु र्मुहु र्नम न्नमन् मुकुन्द पादपद्मयोः
महन् महन् महीयसां प्रभो मम प्रबोधय ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

इति स्वयंप्रभं प्रभुं हृदा हरिं स्मरन् गुणान्
स गद्गदस्वरेण तत्समीपगोऽस्तुवन्मुदा ॥

मायामानुषदेही माधवना माभिवाद्य तं सबलः ।
ते नालिंगितमूर्ति स्सुररिपुवृत्तं तदुक्त मथ वेद ॥

अक्रूरो रामकृष्णाभ्यां व्यवसद्गोकुले सुखम्
अ थोत्थितो रात्रिशेषे समुत्थापयति स्वयम् ॥

≡ देशाक्षी (मलहरी) रागेण, जंपेतालेन गीयते ≡

हे राम हे कृष्ण इह समुत्तिष्ठ ॥प॥
हे राम हे कृष्ण हे जगत्त्रयगुरो
हे पुण्डरीकाक्ष रक्ष निजपक्षम् ॥अ॥
प्राचीदिंगगना परिहसति हे कृष्ण
पतियोग परमसौभाग्य महिता
प्राचीनवैरस्य मभिनयं त्यथ सा
प्रतीचीं दिशं राम काममुदिता ॥
नलिनमुकुलोदर विदलन गलितालयो
ललिततर रविनिर्हुतांधतिमिराः
मिलित नवनलिनपरिमल बहुलमकरंद
कलनया विचरंति काममुखराः ॥
दधिमथनसंजात मधुरतरसंगीत
बुधजनागमघोष रम्यघोषम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

मधुमथन संकलय माधव विधींद्रनुत
पदकमल पद्माकृताभिलाषम् ॥
भूपाल देशाक्षि देवगांधारि शुभ
बिलहरि वसंत मुख रागबृंदम्
गोपिका गायंति गोविंद तव तु शुभ
गुणरत्नबृंद मानन्दकन्दम् ॥
कलितनवमल्लिका कुसुमानि विहसंति
काम मिह तारकाबृंद ममितम्
ललितवचसा ऽक्रूरकलित मिति गुरुभक्त
नारायणानन्दतीर्थ रचितम् ॥

श्रीकृष्णः अक्रूरेण सह मथुरापुरिं प्रति गच्छति

व्यतीतायां स तद्रात्रौ सबलं बलिनां बलम् ।
आरोप्य स्यन्दने तूर्ण मक्रूरो ऽश्वा नचोदयत् ॥
स्यन्दने वसति नन्दनन्दने चन्द्रमंडलसमानने घने ।
मंदहास रमणीय चंद्रिका स्सुन्दरं जगु रिमा हि गोपिकाः ॥

≡कल्याणीरागेण, आदितालेन गीयते≡

अक्रूरो गमयति मधुरा मच्युत मिह सखिसुतराम् ॥प॥
स क्रूरो मायावी तस्य साहस मथ सखि पश्य ॥अ॥
सबलं गोपीजनहृदयांबुज सवितारं सखि सहसा
कब लितनवनीतं कलितागमकारण मसुरविदारण मीशम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

वृंदावनचन्द्रमसं निजजन चन्दन मिंद्रादिनुतम्
नन्दनन्दन मानंदितविधि मुखबृंद मनिंदितस्यन्दननियतम् ॥
संसारार्णव तारकविजय गोपालक मखिलैकगुरुम्
कंसरिपुं शिवनारायणतीर्थ कलित मिदं कविहृदयविहारम् ॥

———

बलेन सहितं कृष्ण मक्रूरस्यन्दनस्थितम् ।
मधुराभिमुखं दृष्ट्वा गोपिका कापि गायति ॥

≡सावेरीरागेण, अटतालेन गीयते≡

स्वामिनं वनमालिनं सखि कलय स्वामिनं वनमालिनम् ॥प॥
श्रीमहोन्नत श्रीवत्सकौस्तुभ विमलकामद विजयगोपालम् ॥अ॥
सुन्दरं सत्यसुखबोधरसिकं सोमवंशजलनिधि पूर्णसोमम्
नन्दनन्दन मिह परमानंद स्यंदने नंदयोगिनुतं सखि
सुर नर किन्नर वरमुनिसेवित सरसगुणार्णव सकलगुरुं मम ॥
अधरबिंब समर्पित मुरली मधुरगीत रसामृतसरसम्
मधुरिपुं सखि माधव मिह पश्य माधुरीभाग्यभर मन्दहासम्
शक्रादि सुरगणसन्नुतपद मिह वक्रकुन्तभार वररत्नाभरणम् ॥
भद्रदं कलय सखि बलभद्रं भव्ययोगदलित मोहनिद्रम्
अद्रिराजधीर मरिवर्गरुद्रं अच्युतेन सहितं सुखप्रदम्
शिवनारायणतीर्थ सेवित मनुपम भव्य मुक्तामणि भवनविहरणम् ॥

———

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

n Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyd

मधुरागमनोत्साहं माधवं वल्लवांगनाः ।
मंगला न्याचरं त्यस्तं जगु स्तस्य जयेच्छया ॥

=सुरटीरागेण, अटतालेन गीयते=

विजयगोपाल ते मंगलं जय विश्वंभर ते मंगलम् ॥प॥
नन्दयशोदानन्दन सुन्दर मन्दस्मित धृतमन्दर
नन्दसुनंदादि वंदितपादार विंद गोविंद जय मंगलम् ॥
चारुकदंबक तरुमूलाश्रित चंचल मणिमय कुंडल
दारुणवैरि संहरणुपराक्रम दासपोषण ते मंगलम् ॥
चन्दनचंपक तुलसीकलनक शीतलवन संचारिणे
वाचा मगोचरचरित सदानन्द वासुदेवाय ते मंगलम् ॥
गोपीमंडल गूढपरायण गोविंद गोकुलनायक
आपदुद्धारक अखिलजनाधार तापहरण ते मंगलम् ॥
वर्धितगोबृन्द वनमालिन् गो वर्धनगिरिधर वामन
तीर्थीकृत शिवनारायणतीर्थ मानससारस मंदिर ॥

अक्रूरो रामकृष्णाभ्यां मधुराभिमुखो व्रजन् ।
आचरन् यामुने स्नानं सलिले दृष्टवान् हरिम् ॥
मुहु र्मुहु स्स्यन्दनस्थं सलिलस्थं हृदि स्थितम् ।
दृष्ट्वा सर्वात्मकं कृष्णं प्राह चे दं स तत्त्ववित् ॥

=तोडीरागेण, आदितालेन गीयते=

जाने भुवनसृष्टि चातुरीधुरीणम्
गोनिकेतनं विजय गोपाल मखिलशरणम् ॥प॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

सकलहृदयकमल सवितृकोटि प्रकाशं
सलिलादिभावमध्य संगमपूरिताशम्
प्रकट मेव फणींद्र प्रचुरशयनदेशं
प्रत्यगभिन्न मखिल परमानन्दनिवेशम् ॥

निगम सारस निचय नित्यविदितभावं
सुगुणमणिसमूह सूत्र सत्स्वभावं
अखिल जगदन्तरात्मान ममितविभवं
खग मृग सुर नरादि घननामरूप मभवम् ॥

नंदित व्रजजना नन्दघनभागधेयं
कंदर्पशतकोटि कलितकांतिकायं
नंदित योगिनिचयं नारदादिगेयं
बृंदावनविहारं बद्धमायूरवलयम् ॥

अवनिमंडलतिलक मच्युत मखिलजनकं
नवनवनीतरसिकं नमदभपदायकं
भवभयनिवारकं भव्यमुक्तिनायकं
शिवनारायणतीर्थ सिद्धानन्ददायकम् ॥

——

मधुरापुरी वर्णनम्

दृष्ट्वा ऽथ मधुरां रामं नगरीं सुरनागरीम् ।
आह चे दं महोत्साहो माधवो मधुरं वचः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

≡सौराष्ट्ररागेण, चापुतालेन गीयते≡

राम मधुरा नगरी रम्या हेमगोपुर प्राकारकलिता ॥प॥
राम रामणीयकाभिराम रत्नकोटीरसंभ रा ॥अ॥
सौधचन्द्रशालाजाल सोमरविलीलालोला
माधुरीभाग्या मारखेला महनीयभूतिविशाला ॥
नवनवमणिश्रेणी नाकरमणी मनोहारिणी
अवनीसुर भारिणी अमर परिवारिणी ॥
कालिंदी हेलिनंदिनी कल्लोलालोल पद्मिनी
मिलित हंसमालिनी मीनांकराज राजधानी ॥
अब्जयोनिकृत्यातीता अखिलसंपदोपेता
लब्धविद्यावादाध्युषिता लक्षित लक्षणसहिता ॥
माधवसुगीत मिंद महित बलरामामोदं
बाधित संसारखेदं भव्यनारायणतीर्थ सुखदम् ॥

——

उपवनवनजेषु हंसमालाः मुनि रिव मानसनिस्पृहा स्तु यस्याः ।
निरवधि सुखमात्र लग्नचित्ताः कथ मपि बाह्य मनुस्मरंति नैव ॥

अवतीर्णो रथा त्तूर्ण मक्रूराधिष्ठिता त्प्रभुः ।
मधुरा राजमार्गेण पद्मा मेव शनै र्ययौ ॥

इति श्री नारायणतीर्थविरचितायां श्रीकृष्णलीलातरङ्गिण्यां
कृष्णमधुराप्रवेशवर्णनं नाम नवमतरङ्गः ॥

——

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

दशम स्तरङ्गः

कथा संग्रहः

श्रीकृष्णचरितं कंसवधाख्य मभिनीयते ।
कंस स्यागमनं पूर्वं देवकीवसुदेवयोः ॥
मधुरानगरीवीथ्यां रजकादे र्विनिग्रहः ।
कुब्जाद्यनुग्रह श्चाथ मल्लमातंगमर्दनम् ॥
कंसासुरवध श्चाथ पित्रो र्दर्शन मादरात् ।
संग्रहो ऽयं चरित्रे ऽस्मिन् कथितः सावधानतः ॥

तौ खलु रामकृष्णौ स्फुटतरनीलपीतसुन्दरपरिधानौ मध्यभागसमभिव्यक्त सरस्वतीविलसित सितासितसरिद्वर संयोगसमुल्लसित विचित्रकांतितिरस्करणप्रवीणौ सत्पथपथिक परिश्रांतिविरामरमणीयौ मुनिवरमनोहंसश्रेणी समाश्रयकरचरणवदननयननाभिसरसीरुह संपत्सरिद्वरकांतिकायौ तुङ्गप्रासादशृंगसंगत चन्द्रकांतमणिगणशशांकसंयोग समुद्गलितललिततरामृत संसिक्तरमणीयसैकत मधुराराजमार्गगामिनौ विचित्रवनमालिनौ मानिनीजनमोहनौ सरलमुरलीगीतसुधासमुद्बोधित सुरकिन्नरादिवरवनिता मनोमयराजहंसगणौ सत्यकामादिगुणौ सकललोकसंरक्षणप्रवीणौ मधुरापुरनिवासिभाग्यपरिपाकविशेषलक्षणौ सुरनगरीनागरीगुरुतरगीत सुधासमाराधनानंदितौ दुर्मदमदविभङ्गतुङ्गधैर्यवीर्यगांभीर्यभावौ परिहृतगोपकुमारभावौ महानुभावौ दृष्ट्वा मुहु र्मुहुः संतुष्टा स्तत्रजना बभूवुः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

आयांतं राजमार्गेण मधुरापुरयोषितः ।
आश्चर्यरूपसंपन्न माश्चर्यं सबलं जगुः ॥

≡यदुकुलकांभोजी (आनंदभैरवी) रागेण, आदितालेन गीयते≡

नन्दनन्दनं निजभक्त चन्दन माकलय ॥प॥
नन्दादिमुनींद्रभाव्या नन्द मालि कलय ॥
सुन्दरानन चन्द्रश्री मंदिर माकलय ॥
शृंगार रसप्रवाह श्रीनिधि माकलय ॥
भ्रूभंय कटाक्षलक्ष्य भूरिकरुण माकलय ॥
सर्वलावण्य तटिनी सागर माकलय ॥
कलभसुन्दर गमन कलितललित माकलय ॥
परिजन रक्षणबद्ध परिकर माकलय ॥
विजयगोपाल मतुल विख्यात माकलय ॥
बलभद्र भद्रदाबाहु बन्ध मि हाकलय ॥
मधुरा मानिनीजन मनसिज माकलय ॥
शिवनारायणतीर्थ सेव्य दिव्यपद माकलय ॥

हरंतं राजवस्त्राणि चरंतं चारुदर्शनम् ।
निरंतर परानन्दरसं कल यालि तम् ॥

श्रीकृष्णः कुब्जां अनुग्रहति

अथ रजकनिग्रहो वस्त्रापहार श्च मालाकारानुग्रहः ।

कुब्जागमनम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

≡ नादनामक्रियारागेण, आदितालेन गीयते ≡

कुब्जा समायाति गोविंदचित्ता अब्जयोनि चातुर्यसर्वस्वभूता
उज्ज्वलविचित्र भूषणोज्ज्वल कज्जलनेत्रशोभित
कस्तूरिफाला करधृत कस्तूरिचन्दनादिसंभारा

— —

कापि कुब्जां सुनेत्राब्जा मब्जनाभो विलोक्य ताम् ।
प्रातिलोम्यगिरां सारैः प्रहस न्निद माह सः ॥

≡ पन्तुवरालीरागेण, अटतालेन गीयते ≡

काममोहिनि कथय किन्नु नाम ते पदम् ॥प॥

कोमलाधर करपादपल्लव
कुमुदबन्धुवदन कुंतलजाले ॥अ॥

तन्वङ्गि तावकतनु रिय भार्जव
मतिवहति सुतरा मानन्दकारिणी
अन्वह मभिनव यौवनघनवन
माचरसि भुवन जनमनोहारिणि ॥

चन्दनमृगनाभि चंपकादिकुसुम
गन्धसुगंधित गगनदिङ्मण्डले
कन्दर्परथिरथ कल्पितशुभगात्रि
कलहंसभाषिणि कल्याणशीले ॥

तव रूप मन्वर्थनाम विदित मिह
भुवि पौरजानपदै रपि विपुलम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

शिवनारायणतीर्थ शिवगीत मिद मिह
भवभयभंजन मभयद मतुलम् ॥

हसंतं वदन्तं समीपे वसंतं
मुहु स्संस्मरंतं तपः प्राक्तनं तत् ।
परप्रेमभक्त्या प्रभुं प्रार्थयन्ती
स्वयं प्राह चेदं वच स्साधु कुब्जा ॥

=सौराष्ट्र रागेण, अटतालेन गीयते=

एहि एहि विजयगोपालबाल
पा हीह मां पालय लोकपाल ॥प॥

भुवनसुन्दर चारुवदनाब्ज भूरिकृपालय भूमाभिधान
सवितृमंडलकोटिभास संसृतिदृढपाश बन्धविदलन ॥
गोपरमणी जाररमण गोविंद गुणमणिगण वराभरण
पापासुर बृन्दनिर्हरण परमपावनचरित पातकहरण ॥
गंधमाल्यादि गृहाण गलितभव फणींद्रगरुडविहरण
सुन्दर मम देहि सुरत मिह सुखयमा मिह देव मम भवशरणम् ॥
कलितकस्तूरिका तिलक करधृत मुरलीकलनाद रसिक
बलजित सुरवैरिनिवह बद्धमायूर गुंजवनच्छद प्रभयक ॥
परिपूर्णानन्दसमुद्र पापमहाटवी पावकरौद्र
परिजनकृत बहुभद्र वरनारायणतीर्थ धृतबोधमुद्र ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

सर्वांगसौन्दर्य सुधापगाया
मपारसंसार विशोधिकायाम् ।
कंसद्विष स्तस्य सुखं चरंती
कुब्जामनोवृत्ति रतन्निवृत्ता ॥
आकर्ण्य कुब्जावचन माश्चर्यं ता मनिंदिताम् ।
अकरोत्करसंस्पर्शा दमरीं सुन्दरीं हरिः ॥
रिरंसया तेन साकं कुब्जा सा काममोहिता ।
पीतांबरधरं श्यामं मधुरं प्राह माधवम् ॥

≡ कापी (भैरवी) रागेण, अटतालेन गीयते ≡

माधव मे रतिं देहि नाथ नाथ माधव मे रतिं देहि ॥प॥
मधुराधरबिंब धन्येयं माननीया त्वया नूनम् ॥अ॥

दीनजन दयाघन	देवकी वरनन्दन
मानिनी मानभंजन	मदनमदन
मुनिमनोनिकेतन	मोहतिमिर निधन
कनकमयपरिधान	कलितनिखिलभुवन ॥
न त्यजामि चेलांचलं	नाथ तव सुरतिमूलं
अतिनीलघनसुन्दरं	आनन्दलीलं
सत्य माशासे गोपालं	सत्यकामादि गुणजालं
भृत्यवर्गपरिपालं	बलभद्रानुजं बालम् ॥
तरणिकोटिकिरण	तामसगुणनिर्हरण
तारकमुक्ताभरण	दासपोषण

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

दूरितदुर्जनगण दोषरहितचरण
वरनारायणतीर्थ वर्णितनिजचरण ॥

श्रीकृष्णः कुवलयापीडादिवधां करोति

प्रार्थित स्त्वनया कृष्ण स्तां समाधाय सत्वरम् ।
बलात्कुवलयापीडं कुंजरं निजघान सः ॥

हत्वा मुष्टिकचाणूरौ धनुर्भंगं विधाय च ।
साग्रजो मातुलसभां प्रविष्टो गीयते ऽमरैः ॥

देवाः कंससभां प्रति गतं श्रीकृष्णं स्तुवंति
≡ शंकराभरणरागेण, अटतालेन गीयते ≡

अवलोकयत श्रीगोविन्दं भो भो भूमा ववलोकयत ॥प॥
नवजलधर श्यामं नंदित बलरामम् ॥अ.।

भुवनसुन्दराकारं भूरिकरुणाकरं
अवनीभार सु रारिविदारं
नवमुक्तामणिहारं नानाविधविहारं
ध्रुवपद विधातारं दूरित संसारभारम् ॥

मल्लचणूर मथनं मत्तमातंग निधनं
फुल्लपंकजदल सन्निभनयनं
वल्लवांगना मदनं वासुदेवाभिधानं
कल्लोलमालिशयनं कंसेभ केसरिणम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

एकांतदैवतं यादवाब्धि समुदितं
श्रीकाकुल नगरी श्रीभूमिसहितं
नाकवल्लभगीतं नारायणतीर्थ रचितं
विकटमोहरहितं विजयगोपाल मसितम् ॥

अवरुह्यासना द्वीरः कंसो रंगगतः खलः ।
युद्धाय सह कृष्णेन स्मरन् प्राग्देवभाषितम् ॥

हतः कंसारिणा कंसः संसार भयहारिणा ।
शौरिणा हरिणा युद्धे जगु स्तं सुरभूसुराः ॥

≡ धुरटी (भूपाल) रागेण, अटतालेन गीयते ≡

पाहि पाहि मां परमकृपालो
देहि मे त्वयि देवसुभक्तिम् ॥प॥

असुरसंहार श्रीविजयगोपाल
अमरसंरक्षण विजयगोपाल
वसुदेवतनय श्रीविजयगोपाल
वासवादिनुत विजयगोपाल ॥

संगीतलोल श्रीविजयगोपाल
सद्गुणशील श्रीविजयगोपाल
शृंगाररसपूर विजयगोपाल
श्रितजनपाल श्रीविजयगोपाल ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

धीरगुणधार विजयगोपाल
धेनुकादि हरण विजयगोपाल
नारद मुनिगेय विजयगोपाल
नारायणतीर्थ विजयगोपाल ॥

मथुरायां हते कंसे माधवेन महात्मना ।
ववृषुः पारिजातादि पुष्पा ण्याकाशत स्सुराः ॥

अनन्तकल्याण गुणाभिरामौ
दुरन्तसंसार तमोविरामौ ।
निरंतरं संस्मरतोः स्वपित्रो
रथांतिकं सम्य गवाप्तवंतौ ॥

परिष्व ज्यांक मारोप्य मूर्ध्न्युपाघ्राय सादरम् ।
देवकीवसुदेवौ ता वाशिंष चक्रतु र्मुदा ॥

जगतीपति रपि भगवान् यदुपतिबन्धु स्सुबन्धु रखिलात्मा ।
हरि रथ मधुरानगरी नारपति मानन्दयन् स त त्रास्ते ॥

इति श्री नारायणतीर्थविरचितायां श्रीकृष्णलीलातरङ्गिण्यां
कंसनिर्हरणं नाम दशमतरङ्गः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

एकादश स्तरङ्गः

कथा संग्रहः

श्रीकृष्णस्य द्वारवती प्रवेशाख्यं चरित्रकम् ।
वर्ण्यते ऽत्र महाचित्र मेकादशतरंगके ॥
आदौ गोप्य स्ततः कृष्ण स्तदनन्तर मुद्धवः ।
समाधानाय गोपीना मुद्धवप्रेरणं तदा ॥
गोपिकोद्धवसंवादः पुनः कृष्णस्य दर्शनम् ।
विद्याभ्यास श्च विधिना गुरो र्वांछितपूरणम् ॥
जरासंधेन संग्राम स्तस्य सेनानिबर्हणम् ।
ततो गुहाप्रवेश श्च निधनं यवनस्य च ॥
मुचुकुंदस्तुति श्चैव कृपया तत्प्रसादनम् ।
द्वारकायां प्रवेश श्च संग्रहो ऽयं प्रकीर्तितः ॥

उद्धवागमनम्

≡नादनामक्रियारागेण, आदितालेन गीयते≡

उत्साहं सर्वभूतानां उग्रकंसादिनिधनं
उच्चै रनुगायं गायं उद्धवो ऽयं विराजते ॥

समाधानाय गोपीनां गोविंदेन प्रचोदितः ।
उद्धवो गोकुलजनैः पृष्टः प्रत्याह कौशलम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

नंदाद्यै स्तोषित स्तत्र माधवोक्ति निवेद्य च ।
संत रहसि गोप्य स्तं प्राहु र्मधुपकल्पितम् ॥

भ्रमर गीतानि

≡कल्याणी (सावेरी) रागेण, अटतालेन गीयते≡

मधुप मधुप दूतं	मन्ये त्वां माधवीय मधुना ॥प॥
मधुरापुर नारी	वदनांबुज
मकरन्द माकलय	मा याहि याहि याहि ॥अ॥
मधुप मधुपूरितं	माधुरी वदनकमल
माधव भास्कर	महित करकलितं
अधुना यादव करुणा	सुधया समुल्लसितं
कथय कथय कि मिह	कामय कलय कामम् ॥
भ्रमर भ्राम्य	मकरंद संभृतेषु
पावनगोविंद	पदचिह्नितेषु
कमनीय मधुरा	कांतार पादपेषु
कि मपि माधववृत्तं	केन वादरणीय मिह ॥
अल मसित सख्येन	सितभाषणे नालं
चल चंचलस्वभाव	चंचरी कासितविचार
परिकलय माधवं	बहुधामरगीतं
वरनारायणतीर्थ	वरदं विजयगोपालम् ॥

श्रुत्वा तद्गोपिकागीतं श्राव्यं श्रुतिमनोहरम् ।
तत्त्व मावेदयन् गोपीः प्रत्या होद्धव उत्सुकः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

≡ रेगुप्ती (मोहन) रागेण, अटतालेन गीयते ≡

गोपालं विद्धि गोपालं विद्धि गोपालम् ॥प॥
गोपीजनगोमध्यचरंतं गोविंदपरमानन्दकन्दम् ॥अ॥
अंतरंगे सततं भांतं आदिमध्यांत वसंतं
संततं सत्सु चरंतं सत्य मेकांतं
अंतरे योगिविचिंत्यं अनुपम सकलागमांतं
हन्त दुरंतसंसारबन्ध हन्तारं विहरंतम् ॥
संयोगवियोग विहीनं साधुमानस जीवनं
मायोपाधिविदलनं मानसासनं गोपालम्
कायक्लेशादि विहीनं कारण मानवजन्मानं
भूयो भूयो विचार्येनं भूमानं भूरि महिमानम् ॥
बुद्धिविकल्पित भेदाभेदं बोधबाधित सर्वखेदं
सिद्धसंभावित सिद्धिंद श्रितजनबर्हि वारिदं
बुद्धमुक्त सिद्धवेद बोधितानन्दमोदं
सिद्ध नारायणतीर्थ सेवितश्रीपादम् ॥

विगलितभयशोका विद्यया लब्धतत्त्वाः
कथ मपि परतत्त्वे स्थापयित्वा मनांसि ।
मुहु रपि परभक्त्या विश्ववन्द्ये मुकुन्दे
मधुनरपरिक्लृप्तं तं प्रति प्राहु रित्थम् ॥

≡ धन्यासीरागेण, त्रिपुटतालेन गीयते ≡

किमु राजते राजसदसि ॥प॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

कुमुदगणेशु कोटिकोटि संख्याकेषु
कुमुदबन्धु रिव कोटिमदन इव ॥अ॥

मधुपकुलवतंस कथय मधुमाधवचरित मिह
मधुकराचाररसिको ऽथ माधवो विजयते
कथ मपि कदा किं स्मरति न स्सदसि रहसि
किमु कुशली वनमाली सुगुणशाली ॥

स्मरति कि मथ बृंदावनभुवि
परमरहसि निशि मुदा परया यत्सुकृतं
सरल मुरलीरवसुधया समाकृष्ट
सुरवनितागण सरससंगीत मिह ॥

कति कति संति न कलहंसगतयः
तत्परिचर्या विधानैक कुशलाः
तदिह न स्मर तीति साधु विदित मिह
त दल मसितसंगवार्तया विफलया ॥

मधुरानगरीनारी मधुरसंगीतरसिके
माधवे वसति मधुरायां मधुरम्
वंदिमागधै रधिकं गीयते गीतं जय हे
गोपिकाजार गोपीना थेति न हि किम् ॥

स्रतपंचदश कलाचन्द्र इव जीवामो
ध्रुवकलया वय मधुना

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

इति मधुसूदनं वद याहि माधवं
प्रति नारायणतीर्थ प्रत्यगात्मान मसितम् ॥

दत्तोत्तर स्समाधाय गोपीबृन्दं स चोद्धवः ।
पुन र्विवेश मधुरानगरीं हरिमंदिरम् ॥
मधुरिपुं मधुरापुर नायकं
नमधिगम्य स चोद्धवनामकः ।
रहसि गोपवधू परिभाषितं
मधुर माह मनोभवरूषितम् ॥

≡कांभोजीरागेण, आदिंतालेन गीयते≡

इति वदति हि गोपी गोपालकृष्ण इति वदति हि ॥प॥
नतयो नुतयः स्मृतयः कृतयः
प्रतिपद मस्माभि स्त्वयि विहिताः ॥
मधुरं मधुरा नगरीनारी मधुरं गायति मधुसूदन ते
अधुना माधव तव किय दस्मत् कृतिभि र्नुतिभि र्नतिभिः स्मृतिभिः ॥
नन्दमुकुन्द परमानन्दं मन्दस्मेर सुधावदनेन्दुं
बृंदावनभुवि संतं वन्दे स्मारं स्मारं वारं वारम् ॥
श्रुतय स्स्मृतयः कथयंति त्वां सुधियः स्वांतःकरणे संतम्
त दपि मनो मे नन्दकिशोरं स्मरति हि युवती करिणी कलभम् ॥
मणिनायकमणि रपि मधुना गुणयोगे सति काचमणीनाम्
मरकतमणि रपि मध्ये घटितो गणनीयः किं न हि काचेषु ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

इति गोपीजनकथितं प्रथितं निजजनकथितं विदितं हरिणा।
यति नारायणतीर्थ ग्रथितं गुरुवरकरुणाभरितं गीतम् ॥

नित्यसिद्धागमज्ञो ऽपि भगवा न्सबलो ऽगमत् ।
विद्यार्थी लोकशिक्षार्थं सांदीपनिमुनिं गुरुम् ॥

रामकृष्णौ सांदीपनिसमीपे विद्याभ्यासं

सांदीपने रागमनं गीयते

≡नादनामक्रियारागेण, आदितालेन गीयते≡

निष्पन्नवेदविज्ञानो नित्यं स्वाध्यायतत्परः
शिष्योपशिष्यसेवितो सांदीपनि र्विराजते ॥

गृहीतविद्यो भगवान् बलराम सहायवान् ।
गुरुं प्रसाद्य विधिना स तस्थौ ब्रह्मचारिभिः ॥

≡सारंगी (केदारगौल) रागेण, आदितालेन गीयते≡

कंसासुरसंहरण कलय कृष्ण
संसारसिंधुतारण ॥प॥
पुंसा मनन्य पुराणपुरुषोत्तम
हंसयतीश्वर शंसितचरण ॥अ॥
पंचजनासुर पाटककलितश्री
पांचजन्यदर पटुतरनाद
वांछितगुरुपुत्र जीवनकारण
मंजुलमौक्तिक माधव घृतवेद ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

वाचा मगोचर वसुदेव तनयं
सदाचारपालक दनुजान्तक
हे चारुकमल विलोचन भवपाश
मोचन शतकोटि मन्मथमोहन ॥

वारिजसंभव वंदितपादाब्ज
भूरिदयारस भुवननाथ
नारायणतीर्थ नतचरणांबुज
नानाविध लीलाविनोद ॥

जरासंधस्य सैन्यानि हतानि हरिणाऽ सकृत् ।
निहतः कालयवनो मुचुकुन्द मुखाग्निना ॥

चिरसुप्तोत्थित स्यास्य मुचुकुन्दस्य पश्यतः ।
अनुग्रहाय भगवा नाविर्भूतो गुहांतरे ॥

मुचुकुन्दो ऽपि तं दृष्ट्वा बन्धहन्तार मात्मनः ।
नृसिंहपदसंलक्ष्यं प्रणमन् स्तौति दिव्यदृक् ॥

≡ कांभोजी (कल्याणी) रागेण, जंपेतालेन गीयते ≡

वेदाद्रि शिखर नरसिंह माकलयामि
विमलविद्युज्ज्वलितजिंह्व
वेदांतवेद्य विमलानन्द विज्ञान
विदलित दुरंतभवमोहं त्वां नौमि ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

परभावभावना दृढबन्धहर मखिल
सुरवैरिदलन खरनखरं
परिपूर्णकरुणासुधा समाह्लादित
प्रह्लादभयहर मुदारं त्वां नौमि ॥

घोरसंसारतारक तारकाधिपति
तरणिमण्डलकोटिभासं
क्षीरगम्भीर वारिधिमथन संजात
वरलक्ष्मी कौस्तुभोल्लासं त्वां नौमि ॥

जगदण्डशतकोटि जननीकलत्र मिह
जन्ममरणादि भयविदूरं
निगममय खगवरयान संचार
नियतलीलामयशरीरं त्वां नौमि ॥

मणिमयकिरीट मणिमकरकुंडलकांति
मथित दिग्दश तिमिरभारम्
अणिमादिभूतिद मनन्यशरणार्थिनां
आधार मखिलसुखसारं त्वां नौमि ॥

निरवद्यगुणरत्न निर्मलांतःकरण
वरणीय वरदाननिपुणं
धीर शिवनारायणानन्दतीर्थ यति
गूढपरमार्थ मतिकरुणं त्वां नौमि ॥

—

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

उद्ध रोद्धर गोविंद पतितं भवसागरे ।
भीकरे श्रीहरे कृष्ण वृष्णिवंश समुद्भव ॥

इति स्तुवन्तं मुचुकुन्द मादरात्
कृपासुधावर्षिदृशा ऽवलोक्य सः ।
हिंत समादिश्य च सत्वरं पुनः
विवेश शौरि र्मधुरा मरिंदमः ॥

द्वारकानगरी हर्म्यशारिका गीतसारिका ।
तारकोत्कलिका मौनितारकानन्द पूरका ॥

शर्मदा निर्मलधियां निर्मिता विश्वकर्मणा ।
तत्र संत हरिं पौरा स्तुष्टा स्तुष्टुवु रीश्वरम् ॥

≡सावेरी रागेण, अटतालेन गीयते≡

वयं धन्या   वयं धन्या
वयं धन्या देव   वसुधातले ॥प॥

स्वयं व्यक्त   परं तत्त्वं
हरिं त्वा मव   लोकयामः ॥अ॥

निखिललोकनिदान   निगमबृन्दैकमान
सुखसत्यामितज्ञान   सुरपालन
मघवदादिपावन   मायया कृतभुवन
अघमूलविनाशन   अत्युतानंगमोहन ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

जलधिमध्यनिर्मित जांबूनदवर
कलितगोपुरहर्म्य गणकमनीया
जलजनाभ तावक जनरम्यद्वारका
अल मधुना ऽस्माभि रवलोक्यते ॥देव॥

वसुधासुधासौध वसतीकृतवास
कुसुमबाणविहरण कूलवन
वसुदेवभागधेय वामदेवादिगेय
सदा नारायणतीर्थ वरद विजयगोपाल ॥

——

अमरदुर्लभभूति र्गियं सती
विमलमानसहंस समाकुला ।
कमलनाभ रमातिमनोरमा
सतत मस्तु त वाद्य महापुरी ॥

अ द्यापि भक्ता ननुकंपयन् मुदा
ह्यद्यानवद्यांनगरीमधिष्ठिताः ।
निरस्तशत्रुर्भगवांन्विराजते
क्ष्मयाच लक्ष्म्या सह सर्वसंपदा ॥

इति श्री नारायणतीर्थविरचितायां श्रीकृष्णलीलातरङ्गिण्यां
श्रीकृष्णद्वारमत्तीप्रवेशवर्णनं नाम एकादशतरङ्गः ॥

——

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

द्वादश स्तरङ्गः

कथा संग्रहः

अथ रुक्मिणीकल्याण महोत्सववर्णन मभिनीयते

भीष्मो थ रुक्मी तत्पुत्रो रुक्मिणी तत्सुता सती ।
वसुदेवो देवकी च बलकृष्णौ सबांधवौ ॥

रुक्मिण्या लिखितं पत्रं श्रीकृष्णाय निवेदितम् ।
ब्राह्मणेन तत स्तत्र रथे नागमनं हरेः ॥

राज्ञां समक्ष रुक्मिण्याः पाणिग्रहण मंगलम् ।
रुक्मिण्या सह कृष्णस्य द्वारकायां समागमः ॥

रुक्मिणीकृष्णयो स्सम्य ग्विवाह स्तदनन्तरम् ।
अष्टपत्नीसमाहारः कथासंग्रह ईरितः ॥

≡भीष्मकः सभायां रुक्मिणीकल्याणं प्रति आलोचयति

त त्रादौ भीष्मागमनम्

≡नादनामक्रियारागेण, आदितालेन गीयते≡

धीमा निह श्रीमा नयं भीमपराक्रमान्वितः
भूमौ विख्यातमाहात्म्यो भीष्मोराजाविराजते ॥

— —

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

अथ रुक्म्यागमनम्

=नादनामक्रियारागेण, आदितालेन गीयते=

रुक्मी रुक्मिण्यवरजो रुचिरांगदकुंडली
तिग्मांशुसम किरीटी दिव्ययुथः समायाति ॥

अथ भीष्ममहाराजो रुक्मिण्याः स्वसुताया विवाहमहोत्सवाय वर मन्विष्यम् स्वमंत्रिभिः कुलवृद्धैश्च समं पर्यालोच्य वासुदेवं वरं रोचयामास किल रुक्मी च तद्वृत्तं ज्ञात्वा चैद्यपक्षत्वा त्सामर्ष मुवाच अल महो विचारेण गोपालवर कन्याप्रदानविषयेण अयं हि जार-चोरशिखामणिः परंतो नास्मत्कुलोचितवर इति राजापि पुत्रस्नेह-वशा त्तद्रोचयामास ॥

अथ रुक्मिण्यागमनम्

=नादनामक्रियारागेण, आदितालेन गीयते=

आयाति श्रीरुक्मिणी शनै रिह गेययोषिद्भि रधुना
कृष्ण मेव चिंतयन्ती सदा हृदि वृष्णिवंश सिंधुचन्द्रं
सौंदर्यनिंदितामरी निरंतर चारुतरनीलकबरी
तन्वी स्वतनुभानुना पराजित तपनकिरण तरुणी ॥

क्रीडागृहं समायांतीं क्रीडंतीं स्वसखीजनैः ।
प्रत्याह रुक्मिणीं दूती यद्वृत्तं भीष्ममंदिरे ॥
रौहिणेये कृतोद्वाहे रेवतीप्राणवल्लभे ।
श्रीकृष्ण स्याथ समयो वैवाहिकमहोत्सवे ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

इति द्वारवतीपौराः प्रशशंसुः पुनः पुनः ।
रुक्मी च रुक्मिणीं दातुं शिशुपालय रोचते ॥
पुत्रस्नेहवशा द्राजा तथैव हृदि निश्चितः ।
एव मालोचिंत सर्वैः बन्धुभि श्चापि मानिनि ॥
इति दूतीवचः श्रुत्वा रुक्मिणी न्यपत द्भुवि ।
उपलभ्य शनै स्संज्ञां प्रलप त्यमलाशया ॥

रुक्मिणी मनोनिश्चयः

=आहिरी (आनन्दभैरवी) रागेण, आदि (जंपे) तालेन गीयते=

नीक्षे कदा देवदेवं गोपालमूर्तिं ॥प॥
साक्षा न्मदनकोटि सौंदर्यभाव्यम् ॥आ॥
प्रकटमृगमदतिलक रमणीयफालं
सकलगुणसंपत्ति सहित मुरुखेलम् ॥
बृंदावनांत भुवि विश्रुतविहारं
नन्दनन्दन मखिल नंदिताकारम् ॥
कालमेघशरीर कलितविद्युद्वसनं
केलीकला कुतुक किंचित्कुंचिताधरम् ॥
तधिमिधिमिकिधि मीति तांडवविलोलं
सिद्धजनविनुत प्र सिद्धतर शीलम् ॥
सरसमुरलिगीत र सामृत लहरी
निरत नारायणतीर्थ निर्मलमनोहंसम् ॥

———

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

निधाय हृदि गोविन्दं रुक्मिणी रुक्मभूषिता ।
मनः संबोध्य गोविंदे समाधा येद माह तत् ॥

रे रे चेतः शृणु विमलहृत्पुण्डरीकांतरस्थे
यस्मिन् मायाविलसितजगत्कोटय स्संति भूम्नि
गोपालं तं भज निगमविद्याविलासानुपालं
भूपालं तं परिहर पुनर्जन्म बन्धैकमूलम् ॥

≡सावेरी (रेगुप्ती) रागेण, अटतालेन गीयते≡

रे रे मानस गोपालं भज दूरे परिहर भूपालम् ॥प॥
आरा दन्तरतर मखिलात्मक बोधानन्दघनं बालम् ॥अ॥
विमलहृदय कमलोदारं वेदशमित विविधविषयाकारम् ।
कमनीयतर करुणासारं सर्वसमभाव भावमहोदारम् ॥
सामादिनिगमान्त संचारधीर धीमदनुस्मृत सुगुणाकारम् ।
समरसमेक मनन्त मनन्वय ममित निरंतर सुखसागरम् ।
जगदंडकोटि पराकाशं सर्व निगमांतर विदित स्वप्रकाशम् ।
अगणितगुणमणि वागीशं देव मागमरूप निजादेशम् ॥
विगलितमोहज भवपाशं विश्व मंगलकृततनु मखिलेशम् ।
भगवन्त मादिगुरुं शिव मद्वयचिद्गगनं नवनीताशम् ॥
सुन्दरतरमुरलीनादं मुनि बृंदविचिंत्य सुन्दरपादम् ।
नन्दतनय मखिलानन्दं शर दिंदुवदन मिह गोविंदम् ॥
बृन्दावनहितगोबृन्दं धृत मन्दर मखिलनिगमकन्दम् ।
नन्दसुनंदादि वंद्य मनन्यक नारायणतीर्थयति वरदम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

इति निश्चित्य सा भैष्मी गोविंदावाप्तये हृदि ।
आराधयन्ती तं कृष्णं प्रेमभक्त्येद माह च ॥

≡कमास् (पन्तुवराली) रागेण, आदितालेन गीयते≡

गोपाल मेव दैवतं भजे सदा गोपाल मेव दैवतम् ॥प॥
सर्वलोककारणं सत्यकामादिगुणम् ॥
भक्तानुग्रहाभिव्यक्त भव्यमूर्तिधारिणम् ॥
यादवाब्धिचन्द्र मिह यतिजनमोहापहम् ॥
कंसादिवैरिविराम कलितदिव्यविग्रहम् ॥
गोपीकावनकुमुद गुरुतरचन्द्रोदयम् ॥
घोरसंसारकारण वारणकेसरिणम् ॥
मनसा ऽपि नगणयामि माधवा दन्यदैवम् ॥
भव्यनारायणतीर्थ दिव्यदृग्विधायिनम् ॥

— —

ततो राजविग्रहधारिणे सुरविद्वेषकारिणे शिशुपालनाम्ने स्वां दातुं कृतनिश्चयं स्वजनं ज्ञात्वा सा रुक्मिणी गोपरमणीमानस मानससरोवर राजीवराजि विराजमानराजहंसं मर्दितमहासुरकंसं भक्तजनरचितप्रशंसं गोविन्दं आत्मानन्दं स्मारं स्मारं विगतमानुषभोगतृष्णा श्रीकृष्णैक-बन्धुत्वनिष्णाता निजसहचरसाहचर्यावलंबिनी सदास्ते ॥

रुक्मिणी श्रीकृष्णा पत्रिकांप्रदास्यति

ब्राह्मणं ब्रह्मविद्वर्यं ब्रह्मण्येव परायणम् ।
दृष्ट्वा तु लिखितं दत्त्वा त मा हानय वै हरिम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

लिखित्वा लिखितं दत्तं विप्रहस्ते तु कन्यया ।
गृहीत्वा लिखितं विप्र स्त्वरया द्वारकां ययौ ॥
स गत्वा द्वारकां रम्यां दृष्ट्वा गोपालनन्दनम् ।
विज्ञापयामास वचो रुक्मिण्या लिखितं द्विजः ॥

रुक्मिण्याः पत्रिकालेखप्रकारः

तथा हि श्रीमते सत्यकाम सत्यसंकल्प सर्वकाम सर्वरस सर्वगन्ध सर्वसंकल्प.दिगुणवते कृताकृत्त मातृमानमेय भेदभिन्नसकल जगदाधाराव भासकाय निष्प्रत्यूह निरतिशयानन्दावदीरित ब्रह्मलोकानन्दाय विश्ववैश्वानरादि सकलनामरूपनिर्वाहकाय सर्वत्र शक्तिसमन्विताय सर्वांतर्यामिने दुष्टनिग्रहशिष्टप्रतिपालकाय भक्तानुकंपया परिगृहीतगोपकुमारभाव.य करचरणनलिनविलसित ध्वजवज्रांकुशादिरेखाय महापुरुषलक्षणाय कनकमणिमय मकरकुंडल कटककटिसूत्रांगदादि दिव्यभूषणभूषिताय भक्तजनकामितकामवर्षि महामोघनीलमेघसमुज्ज्वल विद्युत्पुंजकल्पदिव्यपीतांबरधारिणे श्रीवत्सकौस्तुभ.दिशोभिताय दीनदयापरमूर्तये श्रीकृष्णाय शतकृत्त्वस्सहस्रकृत्व श्च नमो नमः॥

तत्प्रसादं परं कांक्षे कृष्ण नान्यं तु कामये ।
मनसा वचसा नूनं मत्पाणिग्रहणं कुरु ॥

≡सावेरी (मध्यमावती) रागेण, अटतालेन गीयते≡

कांक्षे तव प्रसादं गोपालबाल केवल मे वाहम् ॥प॥

अमितभाग्यदातार मतुलभूरिविस्तारं
कमनीयकरुणाकरं गोपालबालम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

विमतमदविदारकं विद्वज्जनाधारम्
शमितभूरिभूभारं शकलीकृतारिनिकरम् ॥
कामये नान्य महं कंसारे ऽतिदुरूहं
श्यामसुन्दरविग्रहं गोपालबाल
नामरूपनिर्वाहं नानाभुवननिवहं
त्वा मे वाश्रये साहं त्वरया नय मां स्वगेहम् ॥
धरणीमंडलतिलक तापसतारक
परिजनसुखकारक गोपालवाल
कलवेणुनादरसिक घनतरमौक्तिक
वरनारायणतीर्थ वारितदुस्तरनर्थ ॥

नान्यं वृणे पति मशेषगुरो रनन्तात्
त्वत्त स्समस्तगुणधामभि रात्मतुल्यात् ।
क्षेमं सदैव गुरुदेवशिखामणे त्वां
याचे त्वदंघ्रिकमले प्रण तास्मि नित्यम् ॥

≡सावेरी (शहना-मोहना) रागेण, आदितालेन गीयते≡

क्षेमं कुरु सततं गोपाल मम क्षेमं कुरु सततम् ॥प.।
कामं तव पाद कमले भ्रमरी भवतु श्री-
म न्मम मानसं मधुसूदन ॥
अक्षीणकरुणानिधे–आनन्दघन प्रक्षीणदोषतते
शिक्षितासुरगण रक्षितनिजजन
कुक्षिस्थितानेक कोटिलोकावन ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

प्रह्लादभयविदूर-परमयोगिपवन भुवनाधार
मोहरहितचित्त मौनिमानसहंस
साहसहतवैरि संघमहोदार ॥
अजितविजयगोपाल-अनन्तलील अद्भुतपदकमल
विजय द्वारकापुरी विमलकमललोल
निज नारायणतीर्थ नित्यानन्दबाल ॥

—— ——

गौरीशंकरपूजार्थं यात्रा मे नगराद्बहिः ।
यदा तदा ह्यवसरो भवतो मत्परिग्रहे ॥
इति विप्रमुखाच्छ्रुत्वा रुक्मिण्या लिखितं हरिः ।
प्रत्युत्तरं लिखित्वाऽथ तत्र गन्तुं मनो दधे ॥

रुक्मिणी विरहम्

रुक्मिणीवचनम्

हे सूनास्त्र समुल्लसद्विरहिणी संहारदोषादिह
प्राप्तो सि त्व मनंगतां तवशराः पंचत्व मापु र्ध्रुवम् ।
चाप स्ते धरणीं गतः स्मर नदीगामी त्वदीयो ध्वजः
त्वेवं कृच्छ्रगतोऽपि मन्मथ वधूहिंसागुणं नोज्झसि ॥
अकलंकः कमलाप्त स्सौम्य श्शौरि र्भवां स्तु सकलंकः ।
कालारि रुग्रमौलिः कथ मिंदो तवा प्यहो विधुनाम ॥
श्रीकृष्णहृदयं ज्ञात्वा पुनरागमने द्विजः ।
श्रीकृष्णागमनोत्साहं प्राह भैष्मीं प्रति प्रियम् ।

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

= यदुकुलकांभोजीरागेण, आदितालेन गीयते =

शरणं जगता मेव सकलांतरात्मा
त्वरयै वायाति हरि स्ते मति मातनुते ॥
वनमाली किल नूनं वसुदेवापत्यं
सनकादि मुनिहृदय सत्कमलसंवेद्यम् ॥
चारुतरेण रथेन दारुक सारथिना
द्वारवतीनगरा दायाति तव स्वामी ॥
मा बाले कुरु चिंतां मंजुतरालापे
माधव मेष्यसि नूनं वसुधातलतिलकम् ॥
क्षेमं कुरु ते तव क्षीराब्धिशायी
श्रीमा नखिलात्मा चामीकरपरिधानी ॥
हरिचरितमधु नारायण तीर्थमुखोद्गलितम्
परिजन मुनि नर मत्त भ्रमरै रापीतम् ॥

द्विजमुखसरसिजगलितं हरिवचनामृतं समापीय ।
आनन्दानुभवाढ्या रुक्मिण्यास्ते मनस्समाधाय ॥

रुक्मिणी स्वयंवरम्

अथ कोसल कुरु पांचाल मैथिल चेदि मागध मत्स्य मालव वंग कलिंग सौराष्ट्र घूर्जर महाराष्ट्र सैन्धव काश्मीर केरल कोंकण द्रविड नेपाल कर्णाटकादि देशाधिष्ठितारो महाप्रभावाः अतिरथ महारथादि पद्ममहापद्म संख्याकसैन्यकाः राजतजांबूनदमहार्ह वज्रवैडूर्यमरकतादि

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

विचित्ररत्नयुता नेककोटितटिद्रत्नप्रद्योतमान दिव्यविमानसमारूढाः धिक्कृतसुरसंपदाः मत्तमातंगतुरंगवाहन वाहिनीशतपरिवेष्टिताः मदन-मदापहारिसौंदर्यशालिनः सकलकलाकुशलाः कुंडीनगरवरपरिसरसमुदिताः पंक्तिरथा स्समासते ॥

त्रैलोक्यसंपत्कल यावतीर्णा
या रुक्मिणी सागरराजकन्या ।
सेयं भवानीभवभावयुक्ता
संपूज्य निर्याति सखीसमेता ॥

अत्रांतरे द्वारवतीनगर्या
रथेन गत्वा स रथांगपाणिः ।
अस्ते महीपालमहासभायां
सूर्यो यथा दीपसहस्रमध्ये ॥

तत्र खलु वेत्रपाणयः निरस्तसमस्तसम्मर्दा रुक्मिण्याः परिजनाः परितो बभूवुः ॥

पदांगुलिन्यस्तदृशं व्रजन्तीं
भैष्मीं प्रति प्राह च दर्शयन्ती ।
तस्या स्सखी राजसुतान् क्रमेण
वेत्रेण विज्ञापय तीव दूती ॥

== मुखारीरागेण, अटतालेन गीयते ==

दूती - कोमलाधरि रुक्मिणि कोसलाधिपति रयं
कामसुन्दर माकलय कल्याणि राजकन्यके ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

रुक्मिणी- दूति मा कुरु विलंबं नीतिसारज्ञे सुन्दरि
भाति किन्न ते मामकं भावुकं मानसवृत्तम् ॥

दूती - पश्य पांचालमैथिलौ पार्थिवा वथ संपन्ने
निश्चला विभूति र्यत्र नीति र प्यब्जलोचने ॥

रुक्मिणी- तारका इव दृश्यन्ते शारदचन्दसन्निधो
वाग्य दूति प्रार्थिवान् सारविवेकचतुरे ॥

दूती - कौरवं कलय देवि कुरुदेशाधिप मिह
पौरजानपदोपेतं पद्म पत्रलोचने ॥

रुक्मिणी- अत्र किन्नु ते विचित्र चित्रचारित्रसंपन्ने
तत्र त त्राट तन्वंगि तामसी मा भव दूति ॥

दूती - मागध मत्स्य मालव, वंग कलिंग सौराष्ट्र
नगर घूर्जर देश नरपाला नालोकय ॥

रुक्मिणी- संतु राजानो दूतिके सखि सहस्रशो भुवि
किं ततो मे चल बाले कीर्तिमाकलय मयि ॥

दूती - केरल नेपाल कोंकण द्रवि डांध्र कर्णाटक कोसल कुरुपांचाल
धारिणीपालका नव धारय राजकन्यके ॥

रुक्मिणी- चर्वितचर्वणे नालं चक्रिणं दर्शय बाले
सारकमल संकाशाक्षं शारदचन्द्र सन्निभास्यम् ॥

दूती - सुन्दरं पश्य सुन्दरि नन्दयशोदानन्दनम्
नन्दनन्दन माकलय नारायणतीर्थ यतिगीतम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

रुक्मिणी- द्वारकापुरी पालकं दूरितदुर्जन जालकम्
धीर माकलये कृष्णं- वसुदेव देवकीतनयम् ॥

वैदर्भी वसुदेवसू नु नयना न्यन्योन्यविन्यासतो
धन्याना मपि धन्यतां .... कन्या वराणांधुरि ।
अन्योन्योपमितानि यानि भुवि सं त्यन्यानि वस्तूनि तत्
सर्वस्या प्युपमापयं त्विति तयो श्चित्तकतां कुर्वते ॥

कृष्णःरुक्मिणीं रथे आरोप्य द्वारकां प्रति गच्छति

गृहीत्वा पाणिना पाणिं रुक्मिण्या स्त्वरया प्रभुः ।
आरोप्य स्यन्दने भैष्मी द्वारकां प्रस्थितो हरिः ॥

रुक्मी तु समरे कृष्णं जेतु मग्निं पतंगवत् ।
प्रवृत्त स्तेन निर्जित्य रथे बद्धः पशु र्यथा ॥

रुक्मिण्या प्रार्थितः कृष्णो रुक्मिणं च तदग्रजम् ।
प्राग्बन्धा न्मोचयित्वा ऽथ प्रहसन् द्वारकां ययौ ।

समग्रसेनया सार्धं मध्येमार्गे समाहितः ।
बलभद्रो ऽखिलान् जित्वा पर्थिवान् द्वारकां ययौ ॥

रुक्मिणीसहिते कृष्णे द्वारकापुर मागते ।
वसुदेवादय स्सर्वे संतुष्टा स्ताश्च योषितः ॥

तत्र खलु द्वारवत्यां समलसुरभूसुर गरुडगंधर्वकिन्नरविद्याधर प्रमुखामरसहित संपदधरीकृतेंद्रमहासभायां तप्तजांबूनदानेककोटिचन्द्र रविकांतस्फटिकसंघटित वज्रवैडूर्याद्यनेकरत्नस्तंभ मंटपविराजमान सुर-

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

गुरुस्पर्धावर्धित विद्यावद्विबुधोन्नतसंकुलायां अनेककोटिमहाकवि वंदि-गायक परिहासकादिलक्षणलक्षितायां इक्षुक्षीरदधिमधुघृतगुड गोरोचन-जीरकमरीचिकादि मंगलद्रव्यसंभारवत्यां गर्गप्रभृतयः वसुदेवानुमत्या महासंकल्पपूर्वकं रुक्मिणीकृष्णयो र्गांधर्वविधिना वैवाहिकमहोत्सवाय लग्नाष्टकमारभंत ॥

लग्नाष्टयम्

सत्यज्ञानसुखस्वरूप ममलं सर्वोत्तमं नित्यदृक्
प्रत्यक्तत्त्व मचिंत्यशक्तिविलसद्ब्रह्म परं ब्रह्म यत् ।
लोकानुग्रहविग्रहस्य जगतां नाथस्य तस्यामराः
रुक्मिण्या स्सततं विवाहसमये कुर्वंतु ते मंगलम् ॥
सुलग्ने सावधान ॥

गंगाद्याः सरितो ग्रहा श्च शुभदा गंधर्वविद्याधरा
दिक्पाला ऋषय श्च देवमुनयो देव्य श्च गौर्यादयः ।
श्रीवत्सांकितवक्षस स्सुमनसा मग्रेसरस्य प्रभोः
रुक्मिण्या स्सततं विवाहसमये कुर्वंतु ते मंगलम् ॥
सुलग्ने सावधान ॥

यो गोपीनयनोत्पलै रनुपमै राराधितो गोकुले
गोभि र्गोपसुतै रनेकमुनिभि र्हृत्पद्मकोशांतरे ।
मायामानुषविग्रहस्य मरुत स्ते वालखिल्यादयो
रुक्मिण्या स्सततं विवाहसमये कुर्वंतु ते मंगलम् ॥
सुलग्ने सावधान ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

ब्रह्मा विष्णु रुमापति श्श्रुतिचयो वाणी रमोमायुता
आदित्या वसवो गणाधिपमुखा रुद्राश्च भद्रप्रदाः ।
कालांभोधर दिव्यकांतिविलसत्कायस्य मायाविनो
रुक्मिण्या स्सततं विवाहसमये कुर्वंतु ते मंगलम् ॥
सुलग्ने सावधान ॥

वंशीनादविनोद नंदितसुनन्दाद्यो ऽनवद्यो महान्
नाद्यै रभिपूजितः परमया भक्त्या मुहु र्लालितः ।
यः पूर्वं कमलेक्षणस्य कमलानाथस्य तस्यामराः
रुक्मिण्या स्सततं विवाहसमये कुर्वंतु ते मंगलम् ॥
सुलग्ने सावधान ॥

विद्युत्पुंजनिभांबरस्य विलसद्ग्रैवेयकस्य प्रभोः
मुक्ताहारमहार्ह कौस्तुभमणिग्रीवस्य कृष्णात्मनः ।
पूर्णेंदुप्रतिमाननस्य सुतरां पूर्णस्य भक्त्या ऽमराः
रुक्मिण्या स्सततं विवाहसमये कुर्वंतु ते मंनलम् ॥
सुलग्ने सावधान ॥

मीनांकाधिकसुन्दर स्सुरवधू दृक्चातकांभोधरो
गोपीमंडल मंडनांचिततनु र्य स्सुन्दरः पूरुषः ।
तस्याखंडसुखात्मकस्य विदुषा मेकात्मकस्य प्रभोः
रुक्मिण्या स्सततं विवाहसमये कुर्वंतु ते मंगलम् ॥
सुलग्ने सावधान ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

ये सत्यं प्रवदंति सर्वभुवने या धर्मशीलाः स्त्रियः
पातिव्रत्यपरायण स्सुरभयो मन्दारमुख्यद्रुमाः ।
ते सर्वे यदुनायकस्य महत स्सर्वात्मकस्य प्रभोः
रुक्मिण्या स्सततं विवाहसमये कुर्वंतु ते मंगलम् ॥

सुलग्ने सावधान ॥

गर्गाद्यै र्मुनिभि स्सदामित महाशीर्वादवर्माचितो
देवै र्व्योम्नि विमानमध्यकलितै र्दत्तप्रसूनांजलिः ।
संतुष्टामरसम्यगाचरित भेरीनादसंतुष्टवान्
रुक्मिण्या स्सततं विवाहसमये कुर्या त्सदा मंगलम् ॥

सुलग्ने सावधान ॥

रुक्मिणी कल्याणम्

≡शंकराभरणरागेण, अटतालेन गीयते≡

श्रीवासुदेवप्रभो पालय मामु ॥प॥
सकलहितकर सरसगुणगण
निगमसरसिजनियतरसघन
विगतभवभय विनुतसुरवर गगनसुविमल गरुडविहरण ॥
सरसिजोदर चरणविलसित सरसनूपुर साधुहितकर
तरलकुंडल तांडवानन मुररिपो खिलमोहनाभव ॥
निरुपमध्वनि निकरपावन मुरलिकारव मोहिताखिल
सुरवधूगण सुन्दरानन करिवरावन कांचनांबर ॥
दिव्यमंगल गोपवेष दीनपालन वीतदोष
नव्यतर नवनीत रसिक नरसखानघ निखिलजनक ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

देवकीवसुदेव तनय देवराज विरचितविनय
देव नारायणानन्द तीर्थ विरचित दिव्यगीत ॥

≡कल्याणीरागेण, अटतालेन गीयते≡

कल्याणं भवतु सदा कनकांबर कनकाभे भैष्मि ॥प॥
अवलोकय भैष्मीवदनं कृष्ण भुवनसुन्दर भूशशिनम्
नवनीतप्रियवदनं भैष्मि भवभयतारक मतिशुभदम् ॥
संकल्पं कुरु कंसरिपो जय सत्यं प्रति धर्माचरणं
पंकेरुह नय नामर नरपति परिषदि भैष्म्या सह श्रीकृष्ण ॥
भ्रूमध्यंपरिसम्मृ ज्याच्युत भूषय भैष्मीवदन मिह
कमं युगनिहितांगुलि मेनां स्नपय हरे भैष्मीमधु ॥
नव्यसुन्दर परिधाने नानघ देवी मधु नाच्छादय
दिव्यकनकमणि मंगलसूत्रं देवीकंठे स्थापय भो ॥
द्वारवतीनगरी तव सुखदा धीर हरे रमया भवतु
कारणनिर्भर जगता मखुर वि दारण नारायणतीर्थ शरण ॥

भैष्म्याः पाणिसरोरुहांजलिगता रक्ता स्तु मुक्ताः स्थिताः
या मुक्ता गलितानुरागविमलाः कृष्णोत्तमाङ्गाश्रयाः
याता स्तस्य यदूद्वहस्य परमं साम्यं विशुद्धात्मनः
ताः कुर्वं त्वभित श्शुभानि सततं श्रीकृष्णवैवाहिकाः ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

≡पुन्नागवरालीरागेण, रूपकतालेन गीयते≡

रुक्मिणीकल्याणं सदा दृश्यतां ॥प॥
कल्याणगोपालं करुणार्णवालं
माल्यालंकृत मीडे मदनगोपालम् ॥
अमरनारीगीतं आगमविदितं
अमितभाग्योपेत माश्रयेऽनन्तम् ॥
सत्यकामादिगुणं सकलजगत्कारणं
भृत्यसंरक्षणं भवबन्धमोक्षणम् ॥
मुरलीसरलगानं मुनिबृन्दाधीनं
शरणागतपालनं शरदिंदुवदनम् ॥
भवतिमिर घनभानुं भक्त कामधेनुं
शिवनारायणतीर्थ शीघ्रफलदानम् ॥

≡आरभि (शंकराभरण) रागेण, आदि (धवल) तालेन गीयते≡

जय जय बालगोपाल जय जय मदनगोपाल
जय जय विजयगोपाल जय जय कल्याणगोपाल ॥प॥
निरुपम गुणरत्नाकाश निर्मलकीर्ति पूरिताश
शरनिधिमध्य निवेश सारसनेत्र लक्ष्मीश ॥
ब्रह्मादि सुरपूज्यपाद पातकजालविभेद
ब्रह्मण्यदेव धृतवेद बलभद्रवरज भक्तवरद ॥
परिजन हृदयप्रभाव परिचित मुरलीराव
चरित पुण्यैकसेव शिवनारायणतीर्थ देव ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

ब्रह्मग्रंथिं विधा याग्निं प्रतिष्ठापय केशव ।
कृत्वा सप्तपदं कर्म प्रधानं होम माचर ॥
लाजहोमं ततः कृत्वा प्रवेशं होम माचर ।
गन्धर्वपूजां कृत्वा ऽथ स्थालीपाकं समाचर ॥
भुक्त्वा ऽद्य बन्धुभि स्सार्धं भक्ष्यं पायस मुत्तमम् ।
शेषहोमं कुरु स्वामिन् ततो नाकबलिं कुरु ॥
पुष्पशय्यासमारूढो रुक्मिण्या रमया सह ।
भुंक्ष्वा ऽखंडसुखं सत्वं भूमा रव्यं कृष्ण केवलम् ॥

=केदारगौलरागेण, आदितालेन गीयते=

ब्रह्मग्रथिं कुरु कृष्ण त्वं
परिहर मायाकृतबन्धम्
ब्रह्मसभाया मिह वैवाहिक
पावक मिह संस्थापय भो ॥

गुप्तपद स्त्वं तव मायाकृत
सप्तपदाख्यं विहितं कर्म
क्लुप्तं तत्र प्रधानहोमं
कृष्ण कुरु त्वं कृतकृत्यो ऽसि ॥

लाजहोम मथ कुरु कृष्ण त्वं
लक्षणलक्षित मिह लक्ष्म्या
श्रीजाने ऽथ प्रवेशहोमं
श्रेयस्कर माचर कृष्ण ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

गन्धर्वं संपूज्य च विधिना
गरुडध्वज केशव कृष्ण
कुरु विधिना स्थालीपाकाख्यं
कर्म च करुणारसजलधे ॥

इष्टतमं पायस मतिमृष्टं
पिष्टक मति संतुष्टमना
इष्टजनै स्सह भुंक्ष्व यथेष्टं
तुष्टिं पुष्टिं कुरु जगतां भो ॥

शेषशयन लीलामयविग्रह
शेषहवन मिह कुरु कृष्ण
दोषरहित कुरु नाकबलिं भुवि
भूषय भैष्मी मिह भूमन् ॥

लक्षणशय्या मधिरूढ स्त्वं
लक्ष्म्या सह भव धनषालिन्या
अक्षय सुख मनुभव निगमांत
लक्षण संबोधित मङ्गलम् भो ॥

श्रीकल्याण गोपालक
रुक्मिण्याः कल्याण मिदम्
श्रीकर मिह नारायणतीर्थं
प्रकटित मिति यतिवरसुखदम् ॥

———

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

आचार्यवचना त्सर्वं मकरो द्यदुनन्दनः ।
वाचा मगोचरात्मा ऽपि वासुदेव स्स्वमायया ॥

श्रीकृष्णः जांबवत्यादि कन्याः उद्वहति

भैष्मी जांबवती भामा सत्या भद्रा च लक्षणा ।
कालिंदी मित्रविंदा च महिष्यो ष्टा भवन् हरेः ॥
द्वारकानगरीमध्ये सहस्रस्तंभमंटपे ।
रत्नसिंहासनारूढं सकलत्रं जगु स्सुराः ॥

≡कांभोजीरागेण, आदितालेन गीयते≡

आलोकये रुक्मिणी कल्याणगोपालम् ॥प॥
नीलमेघनिभाकारं बालार्कसमानचेलम्
नीलांबरानुजं गो पालं नीलालकांतम् ॥अ॥
द्वारकापुरमंटपे द्वादशादित्यसन्निभे
भूरिरत्नसिंहासने भूसुरघने
वीरासनेसमासीनं विकसितांबुजाननम्
धीरयोगिसेव्यमानं देवकीवसुदेव सूनुम् ॥
शंख दुन्दुभि नादिते शतशो गंधर्वादि गीते
पुंखानुपुंख निगम बुधजनावृते
पंकजेक्षण रंभादि पटुनटनविनोदिते
कुंकुमकेसरवर्षिते कोमलाकारचरिते ॥
दिव्यकिरीट कुंडल दीप्तपीतांबरधरम्
नन्यमुक्तामणिहारं नानाविहारम्

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

अव्ययमभूतिविस्तारं अमरनारी सुराधारं
भव्यकौस्तुभ कन्धरं भक्तमानससंचारम् ॥

अष्टमहिषीसमेतं अमरनारीसुसेवितं
तुष्टपुष्टजनावृतं तुंबुरु गीतम्
इष्टजनसमाश्रितं ईश्वर मपराजितं
दुष्टसर्वलोकजातं देवरानादिविनुतम् ॥

हेममुक्तामणिच्छत्रं हीररत्नकटिसूत्रं
चामरव्यंजनावृतं शरदिंदुवक्त्रं
कामकोटिसमगात्रं कनकांगदादिविचित्रं
श्यामसुन्दरं पवित्रं शरणागतोद्धारगोत्रम् ॥

चन्द्रानन भैष्मी भामा जांबवती सत्य मित्र-
विंदा भद्रा लक्षणा का- लिंदीनायकं
नन्दनन्दन माश्रित बृन्दबृन्दारकवन्द्यं
नंदित नारायणतीर्थ नन्दद मानन्दकन्दम् ॥

——

श्रीगोपालघना दपारकरुणापीयूषधारा स्रुता
या नारायणतीर्थ भूधरपरिक्षिप्ता समस्ता तदा ।
संभूयाच्युतभक्तभूमिषु वहं त्यानन्दयन्ती जगत्
पातित्र्यं विधुनोतु कृष्णाविलसल्लीलातरंगि ण्यसौ ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

कामदा कामिना मेषा मुमुक्षूणां च मोक्षदा ।
शृण्वतां गायतां भक्त्या कृष्णलीलातरंगिणी ॥

इति श्री नारायणतीर्थ विरचितायां श्रीकृष्णलीलातरङ्गिण्यां
श्रीकृष्णरुक्मिणीकल्याण महोत्सववर्णंन नाम
द्वादशतरङ्गः ॥

—— ——

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

मंगलम्

स्वामिन् सर्वजगन्निवासरचितां डोलां सुरेंद्रादिभिः
वज्रस्तंभ विचित्ररत्नखचित स्वर्णस्थले मंटपे ।
आरु ह्यामरवर्यगीतमुनिभि ध्येयात्ममूर्ते हरे
लावण्यामृतवारिधे विहर सत्कीर्तिं सुविस्तारय ॥

≡गौरीरागेण, आदितालेन गीयते≡

जय मंगलं- नित्यशुभमंगलम् ॥प॥

मंगलं रुक्मिणीरमणाय श्रीमते
मंगलं रमणीयमूर्तये ते
मंगलं श्रीवत्सभूषाय शार्ङ्गिणे
मंगलं नन्दगोपात्मजाय ॥

पूतना कंसादि पुण्यजनहारिणे
पुरुहूतमुख देवहितकराय
सूताय विजयस्य सुन्दरमुखाब्जाय
शीतकिरणादिकुल भूषणाय ॥

कालीयमौलिमणि रंजितपदाब्जाय
कालांबुदश्याम दिव्यतनवे
कारुण्यरसवर्षि नयनारविंदाय
कल्याणगुणरत्न वारिनिधये ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

नवनीतचोराय नन्दादिगोप गो-
रक्षिणे गोपिकावल्लभाय
नारदमुनींद्रनुत नामधेयाय ते
नारायणानन्दतीर्थ गुरवे ॥

श्रीम न्नारायण तीर्थ विरचिता ।
श्रीकृष्णलीलातरङ्गिणी समाप्ता ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

प्रक्षिप्ता स्तरङ्गाः

≡कल्याणीरागेण, आदितालेन गीयते≡

ब्रूहि मुकुं न्देति
हे रसने पाहि मुकु न्देति ॥प॥
अक्रूरप्रिय चक्रध रेति
हंस निरंजन कंसह रेति ॥
राधारमण हरे रा मेति
राजीवाक्ष घनस्या मेति ॥
केशव माधव गोवि न्देति
कृष्णानन्त स दान न्देति ॥
अच्युत कृष्ण हरे रा मेति
हरि नारायण तीर्थप रेति ॥

———

≡आरभी रागेण, धवल तालेन गीयते≡

जय जय वैष्णवि दुर्गे   जय जय कलिपतसर्गे
जय जय तोषितभर्गे   जय जय कुचजितदुर्गे ॥प॥
श्रीकरसद्गुणजाले   सिन्धूररंजितफाले
पाकशासनमणिनीले   प्रालेयभूधरबाले ॥
पालितकिसलयचापे   पार्वति लोकैकदीपे
कलिका कोमल रूपे   खंडितत्रिभुवनतापे ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyder

भक्तजनामरभूजे भासितलोकसमाजे
रक्तमृदुलपादांभोजे रंग दुत्तुङ्गवक्षोजे ॥
शङ्करि सत्कृपापूरे संभृतसन्मणिहार
साङ्कवलिप्तशरीरे सङ्गताङ्गकेयूरे ॥
वीणाविनोदिनि गिरिजे विद्रुममणिसन्निभगिरिजे
मानितलोकसमाजे मदनगोपालकसहजे ॥

≡सौराष्ट्ररागेन, आदितालेन गीयते≡

शिव शिव भव भव शरणं मम ।
भवतु सदा तव स्मरणम् ॥प॥
गंगाधर चन्द्रचूड जग न्मंगल सर्वलोकनीड
कैलासाचलवास शिव कर पुरहर दरहास
भस्मोद्धूलितदेह शम्भो परमपुरुष वृषवाह
पञ्चानन फणिहेष शिव परमपुरुष मुनिवेष
आयन्दनटनविनोद सच्चि दानन्द विदलितखेद
नवव्याकरणस्वभाव शिव नारायणतीर्थदेव ॥

≡मध्यमावतीरागेण, आदितालेन गीयते≡

मदनगोपाल ते मंगलं ।
मन्दरधर ते मंगलम् ॥प॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

श्रीरमणीकुच कुंकुमपंकविलिप्त
विशाल भुजांतर
वारिजलोचन वल्लवयुवती
जार सदा ते मंगलम् ॥
कुंडलयुगली मंडितथुदुतर
गंडस्थल ते मंगलम्
भंडन समुदित चंडपुरासुर
खंडनचण ते मंगलम् ॥
रंगदभंगपराक्रम संगत
गंगाधर ते मंगलम्
अंगजजनक भुजंगमतुंग
तुरंगशयन ते मंगलम् ॥
दिनकरमंडलमध्यग संतत
विनतामर ते मंगलम्
वनजभवार्चित पादसरोरुह
मुनिजनहित ते मंगलम् ॥
सामजपोषण शत्रुविभीषण
संश्रुतकौस्तुभभूषण
कामितदायक कमलानायक
सोमान्वय ते मंगलम् ॥

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyde

पंचाक्षरी प्रेस्
ब्राडीपेट, ३-लैन्
गुंटूरु-२.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hydera

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

This PDF you are browsing now is in a series of several scanned rare books and manuscripts from Sanskrit Academy, Hyderabad.

Address:

Manikeshwar Nagar Kaman,

Osmania University, Tarnaka,

Hyderabad, Telangana, 500007

https://sanskritacademy.net/

https://archive.org/details/@sanskrit_academy_hyd

The Academy is currently led by Director Shri Madhushan Penna.

His CV:

Prof. Penna madhusudan,

Director Sanskrit Academy, Hyderabad

Areas of interest

Yoga shastra, nyaya, yoga and vedanta philosophy.

Works

3 mahakavyas, 10 laghukavyas, 30 translations and 140 edited books

Sahitya Academy Awardee for Mahakavya on Gulabrao Maharaj.

Translated the Marathi Jnaneshwari in 9000 Sanskrit shlokas.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

Honours

Honorary D.Litt by National Sanskrit University, Tirupati AP. for his unique contribution in Indian Philosophy.

-Vachaspati

-Yoga Ratna

-Shastra nidhi

-Utkrisht Sanskrit Pandit

-Yajna Surabhi

-Shastri (Karavir Peeth)

-Shastra Ratnakara

Awards

- Sahitya Academy award

- Maharashtra govt sadhana award

- Pt. Satvalekar award

- Pt. Latkar shastri award

- Pt. Ghatate award

- Somnath Trust Award with Gold Medal and title of Best Scholar

- Sribhashyam national award

and many other.

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding Ravi Parimi, Hyderaba

Foreign Travel

The Netherlands, Canada for World Sanskrit Conference 2018.

Indian embassy, Nepal 2023

DVDs on yoga, Indian philosophy and Sanskrit Literature.

mspenna67@gmail.com

Digitization by eGangotri Trust/Sarayu Trust, New Delhi

Funding for Digitization: Shri Ravi Parimi, Hyderabad

Sanskrit Academy, Hyderabad Collection. c/o Hon. Dir. Shri Madhusudan Penna